अनूदितं पत्रम्

पञ्जीयनसंख्या – 768/97

# असमस्य राजपत्रम्

## असाधारणम्

## प्राप्ताधिकारिणा प्रकाशितम्

संख्या – 152 दिशपुरम्, बुधवासरः, 25 मे, 2011, 4 ज्येष्ठः, 1933(शकः)

**असमः सर्वकारः**

**राज्यपालस्य आदेशाः**

**विधानविभागः – विधानशाखा**

**अधिसूचना**

**24 मे, 2011**

**संख्या- एल्.जी.एल्. 83/2010/32 – राज्यपालस्य सहमतिप्राप्तस्य निम्नलिखितः असमविधानसभायाः अधिनियमः सामान्यसूचनार्थम् अत्रैव प्रकाशितम्।**

**असम-अधिनियम-संख्या 9/2011**

**(16 मे, 2011 इत्यस्मिन् दिनाङ्के राज्यपालस्य सहमतिप्राप्तम्)**

# कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयस्य अधिनियमः 2011

अनूदितं पत्रम्

**एकोऽधिनियमः**

(विश्वविद्यालयाधिनियमस्य अंशविशेषाः)

नलबार्याम् एकः शैक्षिक-अनुमोदित-शोधस्तथा आवासिकविश्वविद्यालयस्य स्थापनं सगठनञ्च

***प्रस्तावना-*** कारणं नलवार्याम् एकस्य शैक्षिक-अनुमोदितशोधस्तथावासिकविश्वविद्यालयस्य स्थापनस्य संगठनस्य च सौविध्यर्थम्।

१. **लघुशीर्षकं तथा प्रारम्भणम्** – अनेन भारतवर्षस्य द्विषष्टितमगणराज्यदिवसे निम्नोल्लिखितविधिना विधिः (अधिनियमः) निर्धार्यते-

क. अधिनियमोऽयंकुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयाधिनियमः, २०९९ इत्यनेन ज्ञायते।

ख. राज्यसर्वकारेण आधिकारिकराजपत्रेण अधिसूचितदिवसात् अधिनियमोऽयं कार्यकरी भविष्यति।

२. **परिभाषाः -** अस्मिन् अधिनियमे, अस्यां सूच्यामवस्थितम् अग्रहणयोग्यं कञ्चिदपि अर्थं व्यतिरिच्य,-

क) 'अनुमोदितमहाविद्यालयः' इत्युक्ते एकः महाविद्यालयः यः संलग्नमहाविद्यालयः स्वीकृतिप्राप्तमहाविद्यालयो वा नास्ति, अधिनियमस्य पञ्चमखण्डाधीने विश्वविद्यालयतः अनुमोदितः महाविद्यालयस्य मर्यादाप्राप्तश्च।

ख) शिक्षामण्डलम् इत्युक्ते २६(षड्विशं) खण्डद्वारा संरचिता एका शैक्षिकपरिषद्।

ग) सांस्थिकसभा इत्युक्ते १६ संरव्यकखण्डाधीने संरचिता सांस्थिकगोष्ठी षोडश।

घ) विभागः शब्दस्यार्थो भवति विश्वविद्यालस्य कस्यचित् एकविषयस्यअध्ययनसमूहः विभाग इत्यनेन नामकरणं क्रियते।

ङ) कार्यवाहिपरिषद् शैक्षिकपरिषद् चेति शब्दयोः अर्थौ भवतः कार्यवाहिपरिषद् शैक्षिकपरिषद् च ये क्रमशः १८ संख्यकखण्डे तथा २० संख्यकखण्डाधीने संरच्येते।

च) वित्तसमितिः शब्दस्यार्थो भवति वित्तविषयिकीसमितिः या २८ संरव्यकरवण्डाधीने संरचिता भवति।

छ) प्रशाला इत्युक्ते विश्वविद्यालयद्वारा परिचालित अथवा स्वीकृतः छात्र-छात्राणाम् आवासिकमानकः, यत्र प्रशिक्षणप्रदानस्य अन्यान्यानुषंगिकनिर्देशनादानस्य च व्यवस्थाअस्ति।

ज) विभागाध्यक्षः शब्दस्यार्थो भवति कस्यचित् विभागस्य प्रभारी शिक्षकः, यस्य विश्वविद्यालयः .यथा नामकरणं करोति विश्वविद्यालयस्य अन्ये जनाः अपि तथैव नामकरणं कुर्वन्ति।

झ) छात्रावासः शब्दस्यार्थो भवति छात्राणां छात्रीणां च आवासिकमानकः यः विश्वविद्यालयद्वारा स्वीकृत-परिचालितः प्रशालातः पृथक वर्तते।

ञ) 'स्नातकोत्तरमण्डलम्''स्नातकस्तरमण्डलम्' चेति शब्दयोः अर्थौ भवतः। क्रमशः २२ संख्यकखण्डद्वारा २४ संख्यकखण्डद्वारा संरचितं स्नातकोत्तरमण्डलं स्नातकमण्डलं च।

ट) स्वीकृतमहाविद्यालयः इत्युक्ते एकः संलग्नमहाविद्यालयः अथवा विश्वविद्यालयद्वारा अनुमोदितमहाविद्यालयः अपिच ५ संख्यकखण्डाधीने स्वीकृतिप्राप्तमहाविद्यालयस्य मर्यादालब्धं प्रतिष्ठानम्।

ठ) 'प्रवरणसमितिः' शब्दस्यार्थो भवति चयनसमितिः यस्याः३० संख्यक-खण्डाधीने संरचनं भवति।

ड) राज्यसर्वकारः शब्दस्यार्थो भवति असमसर्वकारः।

ढ) सम्विधयः अध्यादेशाः तथा विनियमाः इति शब्दानामर्थाः भवतु क्रमशः सम्विधिः, अध्यादेशस्तथा विश्वविद्यालयेन प्रणीतः नियमः।

ण) शिक्षकः इत्युक्ते एकोऽधयापकः एकः प्रवाचकः, महाविद्यालयेन विश्वविद्यालयेन वा नियुक्त एकः व्याखाता। अथवा तश्यानां निदेशानांज्ञापकः सूचको वा शोधस्य तत्वावधायको वा यः विश्वविद्यालयेन आख्यायितस्तथा शिक्षकत्वेन स्वीकृतः।

त) विश्वविद्यालयः इत्यस्यार्थः कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः यः संरचितः अनेन अधिनियमेन।

३. **विश्वविद्यालयः** (१) कुलाधिपति-कुलपति-कुलाधिसचिवैः सांस्थिकगोष्ठयाः सदस्यैश्च विधिद्वारा रचितायाः संस्थायाः नाम कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः।

(२) विश्वविद्यालयस्य स्वनाम्ना विधिगतपर्यासोपस्थापयितुं स्थायी-उत्तराधिकारप्राप्तमूद्रा अस्ति।

४. **विश्वविद्यालयस्य क्षमता** -विश्वविद्यालयस्य स्वीया क्षमताऽस्ति, यथा-

(क) निर्दिश्यते यत् (दूरस्थपाठ्यक्रमस्यान्तभूक्तिना सह) कला-प्रौद्योगिकविद्या-शिक्षा-भाषा-विज्ञान-नीतिशिक्षा-आयुर्वैद-ज्योतिष-योग-मन्दिराणां परिचालने तथा च शंकरदेवदर्शन-तान्त्रिक-शाक्तदर्शन-बौद्धदर्शन-प्रकृतिवन्दना-परिवेषाध्ययनादि-स्थानीय-स्तरीयप्रासंगिकपाठ्यक्रमाणां संयोजनेन उन्नतविश्वविद्यालयपर्यायेे विशिष्ट-पुखानुपुंखाध्ययनपरकशिक्षाप्रदानेन सार्धं सर्वक्षेत्रीयशिक्षायाः उन्नयनस्य प्रसारस्य विस्तारस्य च विधानम्।

(ख) अस्य उद्देश्यस्य विस्ताराय विश्वविद्यालयपरिसरे विश्वविद्यालयाद् बहिः च क्षेत्रीयशिक्षाकेन्द्रविशेषप्रयोगशाला अथवा तादृशस्य अन्यस्य केन्द्रस्य स्थापनम्।

(ग) परिसरबहिर्भूतशिक्षादानस्य सम्प्रसारणस्य च सेवायाः व्यवस्थाकरणम्।

(घ) परीक्षां कर्तुं तथा उपाधिं, पदविकां, प्रमाणपत्रं च प्रदातुम्, अन्ये शैक्षणिकभेदाः तथा च कोऽपि उपाधिः, पदविका, प्रमाणपत्राणि, विशिष्टोपाधि वा तेभ्यः विश्वविद्यालयद्वारा अनुमोदनार्थम्।

(ङ) विश्वविद्यालयः समये समये आवश्यकतानुसारं शिक्षणं, प्राशासनिकादिपदं निर्मातुं तत्र नियुक्तिं कर्तुं च। सर्वाणि पदानि राज्यसर्वकारस्य पूर्वानुमोदनेन एव निर्मिताः भविष्यन्ति।

(च) आचार्यरूपेण सहाचार्यरूपेण सहायकाचार्यरूपेण वा जनान् नियोक्तुम् अन्यथा विश्वविद्यालयस्य शिक्षकाः इति रूपेण प्रत्यभिज्ञातुम्।

(छ) अध्येतावृत्तिं, छात्रवृत्तिं, पुरस्काराणि च संस्थापयितुं पुरस्कर्तुञ्च।

(ज) महाविद्यालयानां प्रकोष्ठानाञ्च स्थापनां परिपालनं च कर्तुं, विश्वविद्यालयेन न परिपालितानां महाविद्यालयानां प्रकोष्ठानाञ्च मान्यतां पर्यवेक्षणं च कर्तुं, तथा छात्राणां कृते अन्यवासस्थानानि तथा च तादृशं किमपि मान्यतां निर्मातुम्।

(झ) विश्वविद्यालयस्य छात्राणां कर्मचारिणां च मध्ये अनुशासनस्य नियमनं प्रवर्तनं च कर्तुं तथा च अस्मिन् विषये यथा आवश्यकं मन्यते तत् अनुशासनात्मकं उपायं कर्तुम्।

(ञ) विश्वविद्यालयस्य छात्राणां स्वास्थ्यं सामान्यकल्याणं च प्रवर्धयितुं व्यवस्थां कर्तुम्।

(ट) विश्वविद्यालये प्रवेशार्थं परीक्षाणां निर्धारणं प्रावधानं च कर्तुम्।

(ठ) विश्वविद्यालयस्य उद्देश्यानां वस्तूनां च प्रचारार्थम् अन्येन विश्वविद्यालयेन, प्राधिकरणेन, संघेन, अन्येन सार्वजनिकनैजनिकायेन सह सहकार्यं कर्तुं वा विश्वविद्यालयस्य एकं वा अधिकं प्रतिनिधिं नियोक्तं कर्तुं वा एतादृशस्य कस्यापि निकायस्य उपरि कार्यं कर्तुं, अधिकारः वा संघः वा तादृशप्रयोजनानां कृते यथा सम्मतं भवति, तादृशेषु नियमेषु यथा, समये समये, विहिताः भवेयुः।

(ड) अन्यस्य कस्यापि संस्थायाः विश्वविद्यालये समावेशार्थं कमपि अनुबन्धं कर्तुं तथा च तस्याः अधिकारान्, सम्पत्तिं, दायित्वं च स्वीकर्तुं तथा च अन्यप्रयोजनार्थं यद् अनेनाधिनियमेन सह असङ्गतं न भवति।

(ढ) समये समये निर्धारितशुल्कानाम् अन्यशुल्कानां वा आवश्यकसूचनं संग्रहणञ्च।

(ण) विश्वविद्यालयक्षेत्रस्य अन्तः, बहिः वा न्यासः संपत्तिं, किमपि चलं वा अचलं सम्पत्तिं प्राप्तुं, धारयितुं, प्रबन्धयितुं, निष्कासयितुं च एतादृशसम्पत्तिषु तादृशसम्पत्तौ प्रतिनिधित्वं कुर्वन्तं किमपि धनं निवेशयितुं च यथा विश्वविद्यालयः योग्यं मन्यते।

(त) राज्यसर्वकारस्य अनुमोदनेन ऋणं ग्रहीतुं, विश्वविद्यालयस्य सम्पत्तेः सुरक्षाविषये, विश्वविद्यालयस्य प्रयोजनार्थं धनम् ;तथा च

(थ) तादृशानि सर्वाणि कर्माणि कार्याणि च कर्तुं शक्तिसदृशानि पूर्वोक्तं वा, यथा विश्वविद्यालयस्य उद्देश्यं प्रवर्तयितुम् आवश्यकं भवेत्।

५. **अधिकारक्षेत्रम् -** अस्याधिनियमस्य संरचणानुसारं विश्वविद्यालयस्य क्षमता, असमराज्यस्य सर्वाणि भौगोलिकक्षेत्राणि आहर्तुं क्षमता प्रदीयते। तथा च असमात् बहिर्भूतक्षेत्राणां महाविद्यालयाणां अनुष्ठानानि तथा अन्यान्यसंस्थाः अस्य भौगोलिकसीमारूपेण गण्यन्ते। अथवा विश्वविद्यालयस्य सर्वाः क्षमताः राज्यसर्वकारस्यपूर्वानुमतिसापेक्षं वर्धिताः भविष्यन्ति।

**६. योऽयं विश्वविद्यालयः सर्वासां श्रेणीणां जातीनां धर्मविश्वासानां च कृते मुक्तः**

विश्वविद्यालयोऽयं सर्वैषां व्यक्ति-लिंग-वर्ण-जाति-धर्मविश्वासानां कृते निरपेक्षभावेन मुक्तो भविष्यति , तथा तादृक्व्यक्तिमधिकृत्य धर्मं वृत्तिं वा परीक्षणं कर्तुम् इष्यते चेत् विधिगतभावेन स्वीकृतं न भविष्यति।यदि शिक्षकनियुक्तिः अथवा छात्राणां नामाङ्कनं अथवा सर्वकारीयपदग्रहणार्थं विश्वविद्यालयतः कामपि सुविधालाभार्थं यत्र तादृशस्य परीक्षणस्य आधारेण किमपि इच्छापत्रम् अथवा किञ्चित् यान्त्रिकभावेन दानादिग्रहणं भवति।

**७. विश्वविद्यालयस्य अधिकारिणः -**

(क) कुलाधिपतिः

(ख) कुलपतिः

(ग) कुलाधिसचिवः

(घ) कुलसचिवः/पञ्जीयकः तथा च

(ङ) विश्वविद्यालयस्य सेवायां रतेषु ये जनाः विधानैः विश्वविद्यालयस्य अधिकारिरूपेण घोषिताः भवन्ति ।

८. कुलाधिपतिः -

(१) असमस्य मुख्यमंत्री विश्वविद्यालयस्य कुलपतिः भविष्यति ।

(२) कुलाधिपतिः उपस्थिते सति विश्वविद्यालयस्य प्राङ्गने कस्याञ्चिदपि सांस्थिकगोष्ठ्यां (न्यायालये) सभायां दीक्षान्तसमारोहे च अध्यक्षतां करिष्यति ।

९. कुलाधिपतेः अधिकाराः कर्त्तव्यानि च—

(१) कुलाधिपतिः तादृशविषयाणां निरीक्षणं कर्तुम् अधिकारं प्राप्स्यति यत् कुलाधिपतिः तादृशव्यक्तिम् अन्यं व्यक्तिं वा निर्देशदानेन विश्वविद्यालयस्य कार्याणां सम्पत्तीनां, महाविद्यालयानां संस्थानां निकायानां च परिपालनं तथा च विश्वविद्यालयस्य परीक्षाशिक्षणादिकृतीनां, तस्य अधिकारिभिः प्राधिकारिभिः च सञ्चालितानां कार्याणां तथैव पूर्वोक्तविषयाणाम् अन्येषां च विश्वविद्यालयविषयसम्बद्धानां कस्मिञ्चित् विषये जिज्ञासां कर्तुं शक्नोति ।

(२) कुलाधिपतिः तादृशेषु प्रत्येकेषु सन्दर्भेषु निरीक्षणं जिज्ञासां वा कर्तुं कार्यकरिपरिषदि सूचनां दातुं शक्नोति, तथा तस्य अभिप्रेता परिषद् , कार्यकारिपरिषद् च प्रतिनिधिं अधिकारिणी भविष्यति ,

तादृशनिरीक्षणे जिज्ञासायां वा उपस्थाय तत् श्रवणस्य अधिकारः कुलाधिपतेः भविष्यति। एतादृशनिरीक्षणस्य परीक्षणस्य वा परिणामे।

(३) कुलाधिपतिः कुलपतिं सम्बोधयितुं शक्नोति , तथा कुलपतिमाध्यमेन कुलाधिपतेः विचाराम् कार्यकारिणीपरिषदेभ्यः सम्प्रेष्य तस्मिन् कार्ये कुलाधिपतिः उपदेशं दातुं परामर्शदानं कर्तुम् अर्हति।

(४) कुलाधिपतेः उपदेशेन परामर्शेन तादृशनिरीक्षणस्य जिज्ञासायाश्च परिणामस्वरूपेण गृहीता तादृशी क्रिया यथा प्रस्ताविता वा कृता यदि अस्ति तर्हि कार्यकारिणीपरिषद् कुलपतिद्वारा कुलाधिपतिना सह सम्वादं करिष्यति।

(५) यदा कार्यकारिणीपरिषदा कुलाधिपतेः सन्तुष्टये उचितसमये क्रिया न क्रियते तथा कुलाधिपतिः पश्चात् प्रदत्तं व्याख्यानं कार्यकारिणीपरिषदा नियुक्तस्य प्रतिनिधेः यत्किमपि व्याख्यानं विचार्य यथायोग्यमनुभवति तथा निर्देशानि दातुं शक्नोति , तादृशनिर्देशानाम् अनुपालनाय कार्यकारिणीपरिषद् बाध्या भविष्यति।

(६) कुलाधिपतिना प्रमाणिते सति एतादृशनिरीक्षणसम्बद्धेषु व्ययस्य व्ययसृय व्ययीकृतस्य वा जिज्ञासायाः भारः उत्तरदायित्वं वा विश्वविद्यालयस्य भविष्यति।

(७) विश्वविद्यालयस्य प्रमुखत्वेन कुलाधिपतिः विश्वविद्यालयस्य विभिन्नादिकाराणां क्रियाकलापं स्थगयितुम् अधिकारं प्राप्स्यति यथा यदा परिस्थितिः एतादृशम् आग्रहं करोति तथा च अधिकारस्य कार्याणि नियन्त्रयितुम् एतेषां प्राधिकारिणां सर्व े अधिकारा ः कार्याणि च कुलाधिपतिं प्रति निहितं कुर्वन्ति अथवा तेन यथायोग्यं युक्तियुक्तं च मन्तव्यं तथा कालं यावत् तथा निलम्बिताः अधिकारिणः भविष्यन्ति।

१०. कुलपतिः —

(१) कुलपतिः कुलाधिपतिना प्रयोजनार्थं गठितस्य उपदेष्टामण्डलस्य अनुशंसया नियुक्तो भविष्यति , यस्मिन् त्रयः सदस्याः भवन्ति , येषाम् एकः सदस्य राज्यसर्वकारेण नामाङ्कितः (भविष्यति) , एकः सदस्यः कुलपतित्वेन नामाङ्कितः (भविष्यति), एकः सदस्यः कार्यकारीपार्षदकुलाधिपतिना निर्वाचितः सदस्य (कार्यकारिपरिषदसदस्यत्वेन निर्वाचितः) भविष्यति , तेषु एकं कुलपतिः तादृशविज्ञापनमण्डलस्य अध्यक्षत्वेन अपि नियुक्तिं करिष्यति।

(२) उपदेष्टामण्डलं ( परामर्शमण्डलं) कुलाधिपतिं प्रति त्रयाणां व्यक्तीनां नामपरिषदः अनुशंसां करिष्यति , यत् कुलपतिः अनुशंसितव्यक्तिषु कस्यचित् एकस्य कुलपतित्वेन नियुक्तिं कर्तुं शक्नोति। यदि कुलाधिपतिः परामर्श्य अनुशंसितस्य कस्यापि सदस्यस्य अनुमोदनं न करोति तर्हि सः अनुशंसां आह्वयितुं शक्नोति।

(३) कुलपतिः विश्वविद्यालयस्य पूर्णकालिकः अधिकारी भविष्यति, पञ्चवर्षपर्यन्तं पदौ धारयिष्यति, पुनश्च नियुक्त्यर्थं सः योग्यः भविष्यति। किन्तु अन्यत्र अवधेयांशोऽयं यत् पूर्वोक्तस्य पञ्चवर्षस्य कार्यकालस्य अवधिः समाप्तः भूते सति अपि सः यावत् तसृय उत्तराधिकारी नियुक्तो न भवति तावत् सः कार्ये एव तिष्ठति।

(४) कुलपतेः परिश्रमिकम् अन्ये च सेवानियमाः कुलाधिपतिना निर्धारिताः भविष्यन्ति। अवधातव्यं यत् कुलपतेः मासिकवेतनं सर्वेषां सत्तानां सहितं 25000/- (पूर्वसंशोधित) (प्रत्येकमासात्) न्यूनं न भवेत्। सर्वसत्तासहितं न्यूनं न भविष्यति।

(५) यदा कदापि अवकाशस्य, रोगस्य वा अन्यकारणात् कुलपतिकार्यालये किमपि अस्थायी रिक्तस्थानं भवति तदा कुलपतिः अधिकाराणां प्रयोगाय, कालखण्डे कुलपतेः कर्तव्यनिर्वहणाय

च यावन्तः अन्यव्यवस्थाः उचिताः इति मन्यते , तान् अभावा पूरयिष्यति । कुलाधिपतिः कुलपतेः शक्तिं कर्त्तव्यं च कर्तुं (पालयितुं) अस्थायीरूपेण नियुक्तस्य जनस्य देयं परिश्रमिकं भत्तां वा निर्धारयिष्यति।

**११. कुलपतेः (शक्तिः) क्षमताः कर्तव्यानि च —**

(१) कुलपतिः विश्वविद्यालयस्य मुख्यकार्यकरी शैक्षणिकपदाधिकारी च भविष्यति । सः कार्यकारिणीपरिषदः शैक्षणिकपरिषदः , स्नातकोत्तरमण्डलस्य स्नातकमण्डलस्य वित्तसमितेः चयनसमितेः च पदेन अध्यक्षः भविष्यति तथा च कुलाधिपतेः अनुपस्थितौ सर्वासु सभासु अध्यक्षः भविष्यति न्यायालये सभाप्राङ्गने तथा उपाधीप्रदानार्थं दीक्षान्तसमारोहे चापि सः विश्वविद्यालयस्य कस्यापिप्राधिकारिणः समितेः वा तथैव कस्याञ्चित् सभायाम् उपस्थातुं (उपस्थितो भवितुं) सम्बोधयितुं च अधिकारी भविष्यति।

(२) कुलपतिः (विश्वविद्यालयस्य) अधिनियमः, प्रातिमाः (सम्विधिः) अध्यादेशः, विनियमाः च यथाविधिपालनं भवति न वा तत् पश्यति , तथा च तदर्थं सर्वाणि अधिकाराणि तस्य भवन्ति।

(३) कुलपतिः विश्वविद्यालयसभायाः न्यायालयस्य वा , कार्यकारीपरिषदः, स्नातकोत्तरमण्डलस्य स्नातकमण्डलस्य च सभाम् आहूतुम् अधिकारं प्राप्नुयात् । यदा यदा आवश्यकं मन्यते तदा तदा वित्तसमितिसम्बद्धं चयनसमितिसम्बद्धं निर्धारितसमये स्थाने च सभाम् आह्वयितुं कुलपतिः कुरसचिवं निर्देशयति तता च कुलसचिवः तस्य निर्देशस्य अनुपालनं कर्तुं बाध्यः भविष्यति।

(४) यदि कुलपतिमतेन आपत्कालः उत्पद्यते , यस्य कृते तत्कालं कार्यवाहीकरणीयम् इति आवश्यकं भवति तर्हि कुलपतिः यथा आवश्यकम् इति चिन्तयति तथा कार्यं करिष्यति तथा च तदेव प्राधिकरणसमित्याः समक्षं निवेदयिष्यति यत् ( साधारणतया साधारणे क्रमे कार्यप्रणाली) (अवधि/श्रृंखला/इत्यनेन) विषयः निबद्धः स्यात् । अवधातव्यं यत् यत्र कुलपतिना कृता एतादृशी कापि कार्यवाही विश्वविद्यालयस्य सेवायां रतस्य कस्यचित् जनस्य (व्यक्तिविशेषस्य) सेवां वा पारिश्रमिकं वा प्रभावितं करोति तर्हि तत् तादृशः व्यक्तिः तादृशकार्यवाह्याः सूचनालभस्य तिथितः आरभ्य त्रिंशत् दिवसेषु कार्यकारीपरिषदं प्रति पुनर्विचारस्य निवेदनस्य अधिकारं प्राप्स्यति , यस्याः निर्णय अन्तिमः भविष्यति।

(५) कुलपतिः विश्वविद्यालयस्य कार्येषु सामान्यनियन्त्रणं पर्यवेक्षणं च करिष्यति तथा च विश्वविद्यालयस्य प्राधिकरणस्य निर्णयं प्रभावीकरिष्यति।

(६) विश्वविद्यालये अनुशासनस्य समुचितनिर्वाहसम्बद्धाः सर्वे अधिकाराः कुलपतौ निहिताः भविष्यन्ति।

(७) कुलपतिः अध्यादेशस्य (प्रतिमाभिः) सम्विधिभिः निर्धारितानां अन्येषां च अधिकाराणां प्रयोगं करिष्यति तथा च अन्येषां विविधकार्याणां कार्यं करिष्यति, ये अस्य अधिनियमानां सम्बन्धीनां वा अध्यादेशानां अथवा अग्रे वहितुं आवश्यकाः भवेयुः।

**१२. कुलाधिसचिवः -**

**(१)** कार्यकारिणीपरिषदद्वारा निर्धारितानां पारिश्रमिकभत्तानां विषये कुलपतेः अनुशंसया कुलाधिपतिः कुलाधिसचिवस्य नियुक्तिं दास्यति । सः वर्षद्वयस्य कार्यकालं यावत् परं धारयिष्यति तथा च पूनर्शियुक्त्यर्थं सः योग्यः / अर्हः भविष्यति ।

**(२)** कुलाधिसचिवः कुलपतेः तादृशानां अधिकारानां कर्त्तव्यानां च प्रयोगं करिष्यति, निष्पादयिष्यति च तदर्थं कुलपतिः तं प्रत्यायोजयति ।

**१३. कुलसचिवः**

(१) कुलसचिवः विश्वविद्यालयस्य पूर्णकालिकवेतनभोगी अधिकारी भविष्यति। कुलसचिवस्य सेवायाः नियमाः शर्ताश्च दशावस्थाः वा तादृशाः भविष्यन्ति ये अध्यादेशैः निर्धारिताः भवेयुः ।

(२) कुलसचिवः विश्वविद्यालयसभायाः न्यायालयस्य वा सचिवः , कार्यकारीपरिषदः, शैक्षणिकपरिषदः स्नातकोत्तरमण्डलं स्नातकमण्डलं वित्तसमितिं चयनसमितिं च , परन्तु न्यायालयं विहाय ( न्यायालयस्य अतिरिक्तं ) एतेषु कस्यापि प्राधिकरणः सदस्यः इति न गण्यते ।

**१४. कुलसचिवस्य क्षमताः कर्त्तव्यानिः -** कुलसचिवस्य अधिकाराः कर्त्तव्यानि च निम्नलिखितरूपेण भविष्यन्ति यथा-

(क) अभिलेखानां , विश्वविद्यालयस्य सामान्यमुद्रायाः तथा विश्वविद्यालयस्य एतादृशानाम् अन्येषां सम्पत्तिनां संरक्षकः भवितुं कारृयकारीपरिषद् तं विनियोजयितुं प्रतिबद्धा भविष्यति ।

(ख) कार्यकारिणीपरिषदः शैक्षणिकपरिषदः स्नातकोत्तरमण्डलस्य स्नातकमण्डलस्य वित्तसमितेः चयनसमितेः न्यायसमितेः च सभायाः न्यायालयस्य आधिकारिकपत्राचारस्य सञ्चालनम् ।

(ग) सर्वेशां प्राधिकारिणां समितिनां च सभाम् आहूय तत्ततविषयकाः सर्वासां सूचनानां निर्गन्तुम् एतादृशानां सर्वेषां प्राधिकारिणां समित्याश्च सभायाः कार्यवृत्तरक्षितुम् येषां सचिवः सः अस्ति।

(घ) परीक्षामण्डलस्य निर्देशानुसारं विश्वविद्यालयेन आयोजितानां सर्वासां परीक्षाणाम् अधिक्षकस्य व्यवस्थापनं सञ्चालनञ्च ।

(ङ) विश्वविद्यालयपक्षतः कृतानां सर्वेषाम् अनुबन्धानां सम्विदां, सम्प्रत्ययानां च हस्ताक्षरं सत्यापनञ्च करणम् ।

(च) विश्वविद्यालयस्य निधिषु सामान्यनिरीक्षणं कर्तुं तथा च विश्वविद्यालयस्य वित्तीयनीतिविषये कार्यकारीपरिषदि वित्तसमित्यैः च परामर्शदानम् (परामर्शदातुं)

(छ) कार्यकारीपरिषदः नियन्त्रणाधीनानां विश्वविद्यालयस्य सम्पत्तीनां निवेशानां च प्रबन्धनम् ।

(ज) विश्वविद्यालयस्य कारृयस्य वार्षिकप्रतिवेदनं , विश्वविद्यालयस्य वार्षिकलेखाविवरणं तता अग्रिमं अर्थसंकल्पं कार्यकारिणीपरिषथि प्रसृतुतीकरणम् , विश्वविद्यालयस्य लेखानां सम्यक् परिपालनञ्च ।

(झ) विश्वविद्यालयस्य देयानां सर्वेषां शूल्कानां व्ययानां च मुक्तिं प्राप्तुं

(ञ) कार्यकारिपरिषदद्वारा वा कुलपतिना वा काले काले तसृमै नियुक्तानि अन्यकार्याणि कर्तुं तथा च

(ट) विश्वविद्यालयस्य लिपिकवर्गीयपदेषु अनुसचिवीयपदेषु वा चतुर्थश्रेणीपदेषु च नियुक्तिं कर्तुम्।

**१५. विश्वविद्यालयस्य अधिकारिणः -** विश्वविद्यालयस्य अधिकारिणो निम्नलिखित रूपेण भविष्यन्ति—

(क) न्याय◌ालयः।

(ख) कार्यपरिषद्।

(ग) शैक्षणिकपरिषद्।

(घ) स्नातकोत्तरमण्डलम्।

(ङ) स्नातकमण्डलम्।

(च) अध्ययनमण्डलम्।

(छ) वित्तसमितिः।

(ज) चयनसमितिः।

(झ) ये अन्ये अधिकारिणः प्रतिभागियों सम्बन्धिभिः विश्वविद्यालयस्य अधिकारित्व घोषित भवेयुः।

**१६. विश्वविद्यालयस्य न्यायालयः-**

(१) विश्वविद्यालयस्य न्यायालयः सांस्थिकसभा सांस्थिकगोष्ठी वा यस्मिन् निम्नलिखित◌ा◌ः व्यक्तयः स्य◌ु◌ः क-पदेन सदस्याः-

(क) कुलाधिपतिः।

(ख) कुलपतिः।

(ग) कुलाधिसचिवः।

(घ) कुलसचिवः

(ङ) सचिवः, उच्चशिक्षाविभागः , असमसर्वकारः

(च) उच्चशिक्षानिर्देशकः, असमः

(छ) चिकित्साशिक्षानिर्देशकः, असमः

(ज) प्र◌ोद्यौगिकशिक्षानिर्देशकः, असमः

(झ) अन्यस्य कस्यचित् राज्यस्य राज्यानां वा माध्यमिकशिक्षा, यत्र विश्वविद्यालयस्य अधिकारक्षेत्रं विस्तारयितुं शक्नोति।

(ञ) अन्यस्य कस्यचित् राज्यस्य राज्यानां वा उच्चशिक्षानिर्देशकः, येसु विश्वविद्यालयस्य अधिकारक्षेत्रं विस्तारयितुं शक्नोति।

(ट) कृष्णकान्तसन्दिकै सर्वकारीसंस्कृतमहाविद्यालयस्य अध्यक्षः तथा च अन्ये सम्बन्धाः महाविद्यालया◌ः

(ठ) गौहाटीविश्वविद्यालयस्य तथा च डिब्रुगडविश्वविद्यालयस्य कुलपतिः

(ड) विश्वविद्यालयसम्बद्धानां महाविद्यालयानाम् अध्यक्षाणां एकतृतीयभागः, एकस्मिन् समये स्वतः निर्वाचनेन तथा च प्रति त्रिवर्षेभ्यः परं सम्विधानैः कृतरीत्या शिष्टाचारेण च निवृत्तो भविष्यति।

(ढ) विश्वविद्यालयस्य दशविभागप्रमुखाः प्राध्यापकाः च कार्यकारिणीपरिषदद्वारा निर्णयार्थं परिवर्तनेन संकायसदस्याः विधीयते।

(ण) कुलाधिपतिद्वारा दशसंख्यायां न निर्गतानां व्यक्तीनां दातानां मध्ये परिपालनं करोति। यः विश्वविद्यालयाय पञ्चलक्षं वा अधिकं वा रूप्यकानां राशिः योगदानं दत्तवान् अस्ति।

(त) असमविधानसभायाः सदस्यैः स्वतः निर्वाचिताः सप्तजनाः

(थ) पूर्वोक्तमण्डलेन निर्वाचितौ माध्यमिकशिक्षायाः असम(संस्कृत) परिषदः द्वौ सदस्यौ

(द) विश्वविद्यालयस्य विभागप्रमुखानां प्राध्यापकानां च घटकसम्बन्ध-उपाधिमहाविद्यालयानां प्राचार्यानां च अतिरिक्तं शिक्षकैः निर्वाचित दशजनाः।

(ध) कुलाधिपतिना चिताः संस्कृत-विधि-भाषा-व्याकरण-उद्योग-वाणिज्य-जनजीवनेषु च विशिष्टाः दशजनाः।

(न) तेषाम् अभिरुचिम् अन्यथा प्रतिनिधित्वं न भवति तेषु कुलाधिपतिना चितौ द्वौ जनौ भवतः।

(ऩ) विश्वविद्यालयस्य पञ्चीकृतस्नातकैः निर्वाचितौ पञ्चीकृतौ स्नातकौ, यौ विश्वविद्यालयस्य अथवा विश्वविद्यालयसम्बद्धमहाविद्यालयस्य कर्मचारिणौ न स्तः(भवतः)

(प) स्नातकोत्तरछात्रैः निर्वाचितानां सप्तप्रतिनिधयः अवधातव्यं यत् एवं निर्वाचितः छात्रः निर्वाचनात् पूर्वं न्यूनातिन्यूनं एकवर्षं यावत् विश्वविद्यालयस्य छात्रः भवितुं अर्हति। एतदतिरिक्तं कश्चित् छात्रः यः पाठ्यक्रमस्य छात्रः अस्ति तस्य पाठ्यक्रमस्य कृते निर्धारितकालात् एकवर्षात् अधिकं न गृहीतम्। सः एतादृशचयनार्थं निर्वाचनं करिष्यति।

२. कुलपतिना निर्धारितदिनेषु सभायाः /सांस्थिकगोष्ठ्याः/न्यायालयस्य उपवेशनं वर्षे न्यूनातिन्यूनं द्विवारं प्रायः षट्मासानां अन्तरालेन भविष्यति । प्रथमा सभा वार्षिकसामान्यसभा वर्षे आह्वयितव्या, व्यावहरणीया च भवति। यस्य विश्वविद्यालयस्य वार्षिकलेखाविवरणं, लेखापरीक्षाप्रतिवेदनं, अग्रिमवित्तीयवर्षस्य अर्थसङ्कल्पं च कार्याकारीपरिषदः विचारैः सह प्रस्तुतं भविष्यति

३. कुलपतिः यदा कदापि उचितम् अनुभवति तदा सभासदं तृतीयभागात् (न्यूनेन) अन्यूनेन हस्ताक्षरेण लिखितरूपोग्रहेण सभायाः (न्यायालयस्य) विशेषसभाम् आह्वयितुम् शक्नोति।

**१७. (न्यायालयस्य) सांस्थिकसभायाः क्षमताः कर्त्तव्यानि च** — अस्य अधिनियमस्य प्रावधानानाम् अधीनन्यायालयस्य निम्नलिखिताधिकाराः क्षमताः कर्तव्यानि च भविष्यन्ति। यथा—

(क) विश्वविद्यालयस्य परिषदां नीतिनां कार्यक्रमाणां च समये समये समीक्षां कर्तुं तथा च एतादृशनीतिनां कार्यक्रमाणां कार्यस्य अन्यकार्याणां च परिष्काराय विकासाय च उपायान् सूचयितुम्।

(ख) वार्षिकप्रतिवेदनं वार्षिकलेखाविवरणं लेखापरीक्षाप्रतिवेदनं तथा च अग्रिमवित्तीयवर्षस्य विश्वविद्यालयस्य अर्थसंकल्पं विचारयितुम्।

(ग) वार्षिकप्रतिवेदने लेखाविवरणे लेखापरीक्षाप्रतिवेदने च स्वविचारं प्रकटयितुम् यदि संशोधनमस्ति तर्हि संशोधने परिवर्तनेन सह अर्थसंकल्पस्य अनुमोदनं कर्तुं तथा च तेषां परिवर्तितविषये यथायोग्यमुपायं सूचयितुम्।

(घ) कार्यकारिणीपरिषदद्वारा प्रस्तुतानां सम्विधीनां परिवर्तनेन सह वा विना वा अनुमोदनं कर्तुं, युज्यते तत्काल कार्यकारीपरिषद्द्वारा प्रदत्तसम्विधीनां किमपि परिवर्तनं/संशोधनं कर्तुं पूर्वं कार्यकारीपरिषदः न्यायालयेन सभया वा प्रस्तावितानां परिवर्तनानां विषये विचारयितुम् अवसरः दीयते तथा च न्यायालयः एतादृशसंशोधनविषये कार्यकारिणीपरिषदद्वारा व्यक्तं मतं विचारयिष्यति।

**१८. कार्यपरिषद्** — कार्यकारीपरिषद् विश्वविद्यालयस्य मुख्यकार्यकारी संस्थानिकायः संसद् वा भविष्यति, तत्र निम्नलिखितजनाः भवन्ति। यथा—

(क) कुलपतिः

(ख) कुलाधिसचिवः

(ग) उच्चशिक्षानिर्देशकः ,असमः

(घ) प्र◌ोद्यौगिकशिक्षानिर्देशकः, असमः

(ङ) माध्यमिकशिक्षानिर्देशकः ,असमः

(च) उच्चमाध्यमिकशिक्षानिर्देशकः, असमस्य अध्यक्षकः

(छ) विश्वविद्यालयस्य विभागानां द्वौ विभागाध्यक्षौ, यौ प्राध्यापकौ भवतः, योगी चयनं वरिष्ठताया अनुसारेण (आधारेण) वर्षत्रयं यावत् परिवर्तनेन कुलपतिना करणीयम्।

(ज) असर्वकारीसम्वद्धानां डिग्री (उपाधि) महाविद्यालयानां द्वौ अध्यक्षौ तेषु (परस्परं) निर्वाचितौ भवेताम् ।

(झ) परस्परं निर्वाचित: सर्वकारीय डिग्री ( उपाधि) महाविद्यालयानाम् एक: अध्यक्ष: ।

(ञ) न्यायालयस्य सदस्य द्वयम्, अन्य विश्वविद्यालयस्य कर्मचारी अथवा सम्बद्धस्य अथवा मान्यताप्राप्तस्य संस्कृतशिक्षाया: कर्मचारी।

(ट) जनद्वयम् , येषु न्यूनातिन्यूनम् एका महिला भविष्यति , या कुलपतिना मनोनीता ( चिता) भवति ।

(ठ) असमराज्यसर्वकारेण नामांकितं मनोनीतं व्याक्तिद्वयम्।

(ड) विश्वविद्यालयस्य संकायस्य अध्यक्षेभ्य: कुलपतिना वरिष्ठतानुसारं परिवर्तनेन वर्षत्रयपर्यन्तं चयनित: एक: संकायाध्यक्ष: ।

**१९. कार्यपरिषदः क्षमताः कर्तव्यनि च-** अधिनियमस्य प्रतिविधानानां सम्बिधीनां चाधीने कार्यकारिपरिषद: निम्नलिखिता: क्षमताः (अधिकाराः) कर्तव्यनि च भविष्यन्ति; यथा -

(क) स्नातकमण्डलस्य तथा स्नातकोत्तरमण्डलस्य परीक्षणामाधारेण उपाधि-पदवी-पदविका-प्रमाणपत्रादीनां शैक्षणिकभेदं संस्थापयितुं प्रदातुं च ,तथा च पदानाम् अनुशंसानां विचारं कृत्वा पूर्वं प्रदत्तं तादृशं कमपि उपाधिं, पदविकां, प्रमाणपत्रं वा अन्यं शैक्षणिकभेदं यथावत् निवृत्तं कर्तुम् ।

(ख) मानद- उपाधिं वा अन्यं शैक्षणिकं भेदं संस्थापयितुं प्रदातुं च तथा च स्नातकोत्तरमण्डलस्य स्नातकमण्डलस्य च अनुशंसानां विषये यथासम्भवं विचार्य पूर्वं प्रदत्तं तादृशम् उपाधिं वा शैक्षणिकभेदं वा निवृत्त्यर्थम् ।

(ग) स्नातकोत्तरमण्डलस्य स्नातकमण्डलस्य च अनुशंसानां अवलोकनान्तरं , यथा प्रकरणं सहभागिता- छात्रवृत्ति - पुरस्कारादिपुरस्कारान् संस्थापयितुं तथा च प्रदत्तम् एतादृशं किमपि सहभागिता, छात्रवृत्ति, पुरस्कार, मानदं वा अन्यं पुरस्कृतं वा निवृत्यर्थम् (निरस्तीकर्तुम्) ।

(घ) स्नातकमण्डलस्य स्नातकोत्तरमण्डलस्य च अनुशंसा: विचार्य विश्वविद्यालयस्य प्राध्यापकपदं तथा च अन्यपदं यथा प्रकरणं संस्थापयितुम् ।

(ङ) प्रशासनिक - अनुसचिनादिपदानों यथा आवश्यकं भवति निर्मातुम् ।

(च) चयनसमित्या: अन्य समितीनां च अनुशंसाः विचार्य विश्वविद्यालयस्य अधिकारिणः शिक्षकाणां पुस्तकालयस्य ग्रन्थालयस्य, प्रशासनिकपदाधिकारिणः च तथा

घटकमहाविद्यालयानां प्राचार्याणां शिक्षकाणां च समये समये नियुक्तिं कर्तुं अन्याः समितयः यथा प्रकरणं गठितव्याः भवन्ति।

(छ) स्नातकोत्तरमण्डलस्य स्नातकमण्डलस्य च अनुशंसाः विचार्य यथासम्भवं विश्वविद्यालयस्य शिक्षकाणां तथा घटकमहाविद्यालयानां कर्मचारिणां परिश्रमिकाणां, कत्तर्व्यानां सेवानियमानां च प्रतिविधानं (प्रबन्धनं) कर्तव्यं भवति।

(ज) स्थापितानां महाविद्यालयानां संस्थानां, विभागानां प्रयोगशालानां, संग्रहालयानां, सभागाराणां, छात्रावासानां परिपालने, प्रबन्धने च नियोजयितुम्।

(झ) परीक्षासमित्याः गठनं कृत्वा विश्वविद्यालयपरीक्षायाः संचालनस्य व्यवस्थां कर्तुं तस्य परिणामस्य च प्रकाशनं कर्तुम्। परीक्षासमित्याः संविधानं, क्षमताः अधिकाराः कर्तव्यानि च अध्यादेशेन निर्धारिताः भविष्यन्ति।

(ञ) विश्वविद्यालयेन न स्थापितानि, किन्तु परिपालितानि, प्रबन्धितानि वा तादृशानां ग्रन्थालयानां प्रयोगशालानां संग्रहालयानां सभागाराणां छात्रावासानां च मान्यतां दातुं तथा च तादृशीं मान्यतां निवृत्तं कर्तुम्।

(ट) विश्वविद्यालयस्य सामान्यमुद्रायाः उपयोगं नियमितं च कर्तुं रूपं च निर्धारयितुम्।

(ठ) विश्वविद्यालयस्य चलं वा अचलं वा सम्पदां क्रय-विक्रयणं प्राप्तुं तथा च अस्य अधिनियमस्यान्तर्गतं विश्वविद्यालयस्य प्रयोजनार्थं तादृश्याः कस्याः अपि सम्पदः अनुदानं, निधनं, स्थानान्तरणं वा कर्तुम्, अन्यथा निष्कासनस्य वा प्रशासनस्य वा प्रबन्धनस्य वा व्यवस्थां कर्तुम्।

(ड) सांस्थिकगोष्ठ्याः (न्यायालयस्य) समक्षं विश्वविद्यालयस्य कार्यस्य वार्षिकप्रतिवेदनं, वार्षिकलेखाविवरणं, विश्वविद्यालयस्य अग्रिमवित्तीयवर्षस्य आगणना, वार्षिकलेखाविवरणं लेखापरीक्षाप्रतिवेदनं च कार्यकारिपरिषदि तेषां आवश्यककार्यदिशा विचारार्थम् उपस्थायपितुम्। ध्यातव्यं यत् यावत् वित्तसमित्याः पुरतः तस्य परीक्षणं न कृतम्, तथा यावत् कार्यकारिपरिषद् वित्तसमितेः परामर्शान् दृढतया सूचयति तावत् आगणना सांस्थिकगौष्ठ्यां (न्यायालये) न प्रस्तूयते।

(ढ) अस्मिन् विषये स्नातकमण्डलस्य स्नातकोत्तरमण्डलस्य च अनुशंसाः विचार्य यथासंभवं विभिन्नसंस्थाभ्यः विभिन्नेभ्यः निकायेभ्यः धनस्य निरूपणं कर्तुम्।

(ण) अस्मिन् अधिनियमे सम्विधिषु वा येषां प्रयोगाय विशिष्टं प्रतिविधानं न कृतमस्ति, तादृशानां विश्वविद्यालयस्य अन्येषां सर्वेषाम् अधिकाराणां क्षमतानां प्रयोगं कर्तुम्।

**२०. शैक्षणिकपरिषदः-** शैक्षणिकपरिषदः निम्नलिखितसदस्याः भवन्ति। यथा-

(१) कुलपतिः

(२) कुलाधिसचिवः

(३) विश्वविद्यालयविभागानां सर्वे प्राध्यापकाः विभागप्रमुखाः तथा घटकमहाविद्यालयानाम् अध्यक्षाश्च (प्राचार्याश्च)।

(४) विश्वविद्यालयस्य प्रादेशिकसीमायां स्थितसंस्थायाः तथा विश्वविद्यालयसम्बद्धानां संस्कृतमहाविद्यालयानाञ्च अध्यक्षाः।

(५) विधानैः निर्दिष्टाः व्यावसायिकमहाविद्यालयेभ्यः कुलपतिना (नामाङ्किता) मनोनीता षट् प्राध्यापकाः।

(६) ये शिक्षकाः भवितुमर्हा: वा न वा , कुलपतिना मनोनीता तादृशा: षट् जनाः ।
(७) उच्चशिक्षानिदेशक:, असम:
(८) माध्यमिकशिक्षानिदेशक:, असम:।
(९) पूर्वोक्तपरिषद: अध्यक्षेन मनोनीत: असममाध्यमिकशिक्षामण्डलस्य एकः शिक्षा अधिकारी ।
(१०) प्रौद्योगिकीशिक्षानिदेशक, असम:।

**२१. शैक्षणिकपरिषदः क्षमताः / अधिकाराः कर्तव्यानि च-** शैक्षणिक परिषदः निम्नलिखिता अधिकाराः / क्षमताः कर्त्तव्यानि च भविष्यन्ति, यथा-

(क) समये समये अध्ययनशाखा: निर्धारयितुं निर्दिष्टुं च, यत्र निर्देशानां संशोधनस्य अनुसन्धानस्य तथा च ज्ञानस्य उन्नयनस्य प्रसारस्य च प्रतिविधानानि प्रावधानानि नियमाः कर्तव्यानि भवन्ति।
(ख) परीक्षासमित्याः, स्नातकोत्तरमण्डलस्य, स्नातकमण्डलस्य च अनुशंसानां विचारं कृत्वा, पाठ्यक्रमानां परीक्षाणाम् अनुमोदनं कर्तुं आवश्यकतायां सत्यां च प्रतिमानं संशोधनेन सह वा परिवर्तनेन सह वा विना वा संशोधनं कर्तुं, यथा स्यात् ।
(ग) स्नातकोत्तरमण्डलस्य स्नातकमण्डलस्य च अनुशंसानां विचारं कृत्वा परिवर्तनेन सह वा विना वा, स्नातकोत्तर- स्नातक-अन्तर-पाठ्यक्रमेषु छात्राणां प्रवेशस्य संस्थितीनां (प्रतिबन्धानां ) अनुमोदनं कर्तुं, यथा प्रकरणं भवति ।
(घ) विश्वविद्यालयस्य पुस्तकालयस्य पर्यवेक्षणं कर्तुम्।
(ङ) विश्वविद्यालयस्य शैक्षणिककार्यं प्रभावितं कुर्वन्तः कस्मिन् अपि विषये स्नातकोत्तरमण्डलाय, स्नातकमण्डलाय, अध्ययनमण्डलाय च एतादृशानि निर्देशानि दातुं तथा च एतादृशान् उपायान् सूचयितुं यथा योग्यं मन्यते सुचितानाम् उपायानां विषये मण्डलैः व्यक्तानि विचाराणि तथा च यथा योग्यं मन्यते तथा निर्णयान् ग्रहीतुम।
(च) स्नातकोत्तरमण्डलस्य, स्नातकमण्डलस्य, परीक्षासमितेः च सभायाः कार्यवाही लोकवृत्तान्तं प्राप्तुं तथा च तत्सम्बद्धेभ्यः मण्डलेभ्यः अथवा समितिभ्यः तादृशीः अनुशंसाः कर्तुं; यथा उचितम् अनुभूयते ।

**२२. स्नातकोत्तरमण्डलम्-** स्नातकोत्तरमण्डलस्य निम्नलिखितसदस्याः भविष्यन्ति, यथा-

(१) कुलपतिः

(२) कुलाधिसचिव:

(३) विश्वविद्यालयस्य स्नातकोत्तरविभागानां प्राध्यापकानां विभागप्रमुखानाञ्च तथा शैक्षणिकपरिषद्वारा निर्वाचितानां घटकमहाविद्यालयानां विभागप्रमुखानां मध्ये षट् जना: ।

(४) शैक्षणिकपरिषदः सदस्यद्वयं, ये शैक्षणिकपरिषद्वारा निर्वाचिताः विश्वविद्यालयस्य, अथवा घटकमहाविद्यालयस्य प्राध्यापकाः अथवा विभागप्रमुखाः न सन्ति।

(५) कुलपतिना मनोनीता: चत्वार: जना:,ये विश्वविद्यालयस्य प्राध्यापकाः भवितुमर्हन्ति अथवा नार्हन्ति , तथा च।

(६) कुलपतिद्वारा मनोनीता: परीक्षासमितिसदस्य: एक: ।

**२३. स्नातकोत्तरमण्डलस्य क्षमताः कर्तव्यानि च -** अस्य अधिनियमस्य,सम्विधीनाम्, अध्यादेशस्य प्रतिविधानामधीने स्नातकोत्तरमण्डलस्य निम्नलिखित-क्षमताः कर्तव्यानि च भविष्यन्ति, यथा-

(क) स्नातकोत्तरपाठ्यक्रमाणां प्रारूपम् , एतादृशपाठ्यक्रमानां कृते आयोजितव्याः परीक्षाः, तेषां पुनरीक्षणं च शैक्षणिकपरिषदं प्रति (अनुशंसितुम्) अनुशंसनाय।

(ख) अध्ययनमण्डलस्य अनुशंसानां विचारं कृत्वा स्नातकोत्तरपाठ्यक्रमाण्यां पापक्रमस्य पाम्यविषयत्य च अनुमोदन कर्तु तथा च आवश्यकतायां सालां तेषु परिवर्तन (संशोधन) कर्तुम्।

(ग) कार्यकारीपरिषद् इति संस्थायाः तथा सहभागिता- पुरस्कार -छात्रवृत्तिः पुरस्कार- मानद उपाधि-इत्यादीनां च कृते अनुशंसितुं, तथा च अन्येषां पुरस्काराणां अन्येषां शैक्षणिकभेदानां संस्थायाश्च कृते तथा च उपाधि पदविका-उपाधि -प्रमाणपत्रप्रदानार्थं, स्नातकोत्तर पाठ्यक्रमेषु शैक्षणिकभेदानां परीक्षाणामाधारेण तेषां निवृत्यर्थञ्च।

(घ) संस्थायाः स्नातकोत्तर पाठ्यक्रमाय आवश्यकानां प्राध्यापकानां पाठकपत्रानां, व्याख्यानपदानाम् अथवा अन्येषां शिक्षकपदानां च कृते तथा च विश्वविद्यालयस्य एतादृश पाठ्यक्रमाणां कृते शिक्षकत्वेन जनानां मान्यतायाः कृते कार्यकारीपरिषदि अनुशंसाः कर्तुं, तथा तादृशपाठ्यक्रमानां तेषां पारिश्रमिककर्तव्यानां विषये, तेषां सेवानां नियमानाञ्च विषये।

(ङ) स्नातकोत्तरपाठ्यक्रमेषु छात्राणां प्रवेशस्य नियमान् प्रतिबन्धान् शैक्षणिकपरिषदि अनुशंसितुं तेषाम् उपस्थितेः प्रगतेः च नियमान् कर्तुम्।

(च) विभागेषु स्नातकोत्तरपाठ्यक्रमं प्रदानाय तथा-

(छ) घटकमहाविद्यालयेषु संस्थासु च छात्राणां निवासस्थानस्य अनुशासनस्य, तेषां स्वास्थ्यकल्याणस्य च प्रचारार्थं नियमान् कर्तम्।

(ज) विश्वविद्यालयेन स्थापितानां पुस्तकालयप्रयोगशालानां संग्रहालयानां तथा च स्नातकोत्तर विभागाय तथा निर्देशेषु स्नातकोत्तरपाठ्यक्रमेषु अथवा शोधकार्येषु संलग्नमां घटक महाविद्यालयानां संस्थायाश्च धनस्य निरुपणविषये कार्यकारीपरिषदि अनुशंसाः कर्तुम्।

(झ) स्नातकोत्तरपाठ्यक्रमेषु अनुसन्धानेषु च निर्देशयितुं प्रवृत्तानां स्नातकोत्तरविभागानां महाविद्यालयानां संस्थानाञ्च कार्याणां समीक्षां कर्तुं, तस्मिन् विषये प्रतिवेदनस्य अह्वानं कर्तुं, अनुसन्धानशिक्षणादिस्तरस्य उन्नयनार्थम् आवश्यकानि सर्वाणि पदानि च ग्रहीतुं तथा च अन्यानि कार्याणि विधातुम्।

(ञ) विश्वविद्यालयस्य शैक्षणिक कार्यं प्रभावितं कुर्वति कस्मिन् अपि विषये शैक्षणिकपरिषदद्वारा उपदिष्टानाम् उपायानां विषये विचारयितुं तथा च तेषु स्वविचारं प्रकटयितुं, कार्यकारीपरिषदा अथवा शैक्षणिकपरिषदा तस्मै निर्दिष्टष्य कस्यापि विषयस्य सम्बन्धे विचारं कर्तुं तस्मिन् विषये प्रतिवेदनं दातुञ्च कार्यकारीपरिषदि, तथा च तद्विषये प्रतिवेदनानि कार्यकारीपरिषदि अथवा शैक्षणिकपरिषदि यथासम्भवं उच्च प्रस्तुतव्यानि।

(ट) अध्ययनमण्डलानाम् अनुशंसानां विचारं कृत्वा संशोधनसहितं वा विना वा स्नातकोत्तरपरीष्टाणां कृते परीक्षकाणां (पटलानां) कर्म सम्पादिकानाम् अनुमोदनं कर्तुं तथा च सम्बन्धित अध्ययनमण्डलैः सह परामर्शं कृत्वा कदापि तस्मिन् परिवर्तयितुम्।

(ठ) विश्वविद्यालये अनुसन्धानं प्रवर्धयितुं तथा च शोधस्य उपाधिं नियन्त्रयितुं नियमान् विधातुं तथा च।

(ड) स्नातकोत्तर मण्डलस्य अधिकारक्षेत्रे स्थितानां कस्यापि विषयस्य सम्बन्धे समितीनां नियुक्तिः तेषां सन्दर्भनियमानां निर्धारणञ्च कर्तुम् ।

**२४. स्नातकमण्डलम् -** स्नातकमण्डले निम्नलिखितसदस्याः भविष्यन्ति, यथा;-

(१) कुलपतिः

(२) कुलाधिसचिव:

(३) प्राध्यापकानां विश्वविद्यालयस्य घटकमहाविद्यालयानां च विभागाध्यक्षाणां शैक्षणिकपरिषद्वारा निर्वाचिताना: त्रयः जना: ।

(४) शैक्षणिकपरिषद्वारा स्वसदस्यानां मध्ये निर्वाचिता: षट् प्राचार्या: (अध्यक्षा:), तेषु न्यूनातिन्यूनं त्रयः व्यावसायिकमहाविद्यालयेभ्यः भवितव्या: ।

(५) ये शैक्षणिकपरिषदः सदस्याः भवितुम् अर्हन्ति अथवा नार्हन्ति तादृशा: कुलपतिना मनोनीता: त्रय: जना: ।

(६) मान्यताप्राप्तमहाविद्यालयानाम् अध्यापकानाम् मध्ये दश जना: निर्वाचिताः भवेयुः । तथा च

(७) कुलपतिना मनोनीता परीक्षासमितिसदस्य: एक: ।

**२५. स्नातकमण्डलस्य क्षमताः कर्तव्यानि च -** अस्य अधिनियमस्य,सम्विधीनाम्, अध्यादेशस्य प्रतिविधानामधीने स्नातकमण्डलस्य निम्नलिखित-क्षमताः कर्तव्यानि च भविष्यन्ति, यथा-

(क) स्नातकपाठ्यक्रमाणां प्रारूपम् , एतादृशपाठ्यक्रमानां कृते आयोजितव्याः परीक्षाः, तेषां पुनरीक्षणं च शैक्षणिकपरिषदं प्रति (अनुशंसितुम्) अनुशंसनाय ।

(ख) प्राध्यापकपदस्य संस्थानां कृते कार्यकारीपरिषदं प्रति अनुशंसां कर्तुं, विश्वविद्यालये तथा घटकमहाविद्यालयेषु स्नातकपाठ्यक्रमेषु तथा च एतादृशपाठ्यक्रमेषु शिक्षकानां कृते आवश्यकपदानां विश्वविद्यालयस्य शिक्षकत्वेन मान्यतायै तथा च तेषां पारिश्रमिकाणां, कर्तव्यानां, सेवानां नियमानाम् च विषये अनुशंसां कर्तुम्।

(ग) छात्रवृत्ति-पुरस्कार-सम्मानानां कृते, स्नातकोत्तरपाठ्यक्रमेषु उपाधि-पदविका-प्रमाणपत्राणां कृते, अन्येषां स्नातकपाठ्यक्रमसम्बन्धीनां शैक्षणिकभेदानां कृते च कार्यपरिषदं प्रति अनुशंसां कर्तुम्।

(घ) स्नातकपाठ्यक्रमस्य पाठ्यसामग्रीं पाठ्यक्रमं च अनुमोदयितुं तथा च विचारानन्तरं आवश्यकं चेत् सम्बन्धित अध्ययनमण्डलस्यअनुशंसानुसारं परिवर्तनं कर्तुम्।

(ङ) अङ्गीभूतमहाविद्यालयेभ्यः संस्थाभ्यः स्नातकोत्तरपाठ्यक्रमेषु निर्देशान् प्रदातुं विभागेभ्यश्च धनस्य संस्तुतिविषये कार्यपरिषदं प्रति अनुशंसां कर्तुम्।

(च) स्नातकविभागानां महाविद्यालयानाञ्च कार्यस्य समीक्षां कर्तुं तथा संस्थाभ्यः स्नातकपाठ्यक्रमेषु निर्देशं प्रदातुं तस्मिन् विषये प्रतिवेदनानि आह्वयितुम्, आवश्यकानि पदक्षेपं च ग्रहीतुंम्, तत्र अध्यापनस्य अन्यकार्यस्य च स्तरस्य समुन्नतये च निर्देशप्रदातुम्।

(छ) स्नातकपाठ्यक्रमेषु छात्राणां प्रवेशाय निमयानां, छात्राणाम् उपस्थितेः प्रगतेः च नियमानां च शैक्षणिकपरिषदं प्रति अनुशंसा कर्तुम्।

(ज) स्नातकपरीक्षायाः कृते परीक्षकाणां सूची परिवर्तनेन सह, विनैव विचार्य अध्ययनमण्डलस्य अनुशंसानुसारम् अनुमोदनं कर्तुं तथा च अध्ययनमण्डलेन सह परामर्शानन्तरं तस्य परिवर्तनं कर्तुम्।

(झ) स्नातकोत्तरपाठ्यक्रमेषु छात्राणां निवासस्थानस्य, स्वास्थ्यस्य अनुशासनस्य च विषये नियमान् कर्तुम्।

(ञ) विश्वविद्यालयस्य शैक्षणिककार्यस्य कृते कस्यापि विषये शैक्षणिकपरिषद्द्वारा निर्दिष्टानाम् उपायानां विषये विचारं कर्तुं, तेषु स्वविचारं प्रकटयितुं कार्यपरिषद्द्वारा शैक्षणिकपरिषद्द्वारा च तस्मै निर्दिष्टं किमपि विषयं विचारयितुं, तस्य विषये यथावत् प्रतिवेदनं कार्यकारिणीपरिषदं शैक्षणिकपरिषदं वा प्रति प्रस्तोतुम्।

(ट) स्नातकमण्डलस्य अधिकारक्षेत्रे कस्यापि विषयस्य विषये समितीनां नियुक्तिं कर्तुं, तेषां कार्यक्षेत्राणि च निर्धारयितुम्।

**२६. अध्ययनमण्डलम् -**

(१) अध्ययनस्य प्रत्येकस्मिन् मुख्यशाखायां शिक्षामण्डलम् अध्ययनमण्डलं वा स्यात्। ताः शाखा: निर्दिष्टा: भविष्यन्ति, आवश्यकतायां च शैक्षणिकपरिषद्द्वारा परिवर्तनं करणीयम्।

(२) प्रत्येकस्मिन् अध्ययनमण्डले (शिक्षामण्डले) निम्नलिखिता: सदस्या: भविष्यन्ति, यथा-

(क) सम्बन्धितशाखायां कुलपतिना मनोनीत: विश्वविद्यालयस्य एक: प्राध्यापक: अथवा विभागाध्यक्ष: अध्यक्षो भवति।

(ख) शैक्षणिकपरिषद्द्वारा निर्वाचिता: अध्ययनशाखायां योग्यतायुक्ता: त्रय: जना:।

(ग) कुलपते: अनुमोदनेन अध्यक्षद्वारा मनोनीत: विश्वविद्यालयेन सह असम्बद्ध: एक: विशेषपरामर्शदाता भवति।

(३) कुलपते: पूर्वानुमोदनस्य अधीनं मण्डलं स्वक्षेत्रस्यान्त: कस्यापि विषयस्य आवश्यकतायाम् अन्यविशेषज्ञै: विशेषज्ञै: वा परामर्शं कर्तुं शक्नोति।

**२७. अध्ययनमण्डलस्य अधिकाराः(क्षमता:) कर्तव्यानि च-** अस्य अधिनियमस्य सम्विधीनाम् अध्यादेशानां च प्रावधानानाम् अधीनस्थस्य प्रत्येकस्य निम्नलिखितक्षमता: कर्तव्यानि च भविष्यन्ति। यथा-

(क) विभिन्नपाठ्यक्रमानाम् कृते निर्धारितपाठ्यक्रमस्य, पाठ्यविषयस्य, पाठ्यक्रमस्य प्रतिरूपस्य च विषये, तथा एतादृशपाठ्यक्रमस्य कृते आयोजितानां परीक्षाणां विषये स्नातकोत्तरमण्डलाय अथवा स्नातकमण्डलाय अनुशंसां कर्तुं (अनुमोदयितुम्) तथा च परिवर्धितपाठ्यक्रमस्य, पाठ्यक्रमस्य, पाठ्यविषयस्य च परीक्षाणां च पुनरीक्षणार्थं यथावत् अनुशंसाः कर्तुं यतोहि ते अध्ययनस्य शाखाविशेषस्य क्षेत्रेण सह सम्बद्धाः भवन्ति।

(ख) विभिन्नपरीक्षाणां कृते परीक्षकाणां सज्जीकरणं (आवश्यकसमये) आवश्यकतायां च संशोधनार्थं, परीक्षासमित्याः समक्षं प्रस्तुतीकरणार्थञ्च तथा च

(ग) स्नातकोत्तरमण्डलेन स्नातकमण्डलेन वा, शैक्षणिकपरिषद्द्वारा कार्यकारिणीपरिषद्द्वारा वा, यथा प्रसंगेन , तन्निर्दिष्टस्य अन्यस्य कस्यचित् विषयस्य सम्बन्धे विचारयितुं तथा निर्दिष्टविषये सम्बन्धितप्राधिकारिण: समक्षं प्रतिवेदनं प्रस्तुतकरणार्थम्।

**२८. वित्तसमितिः -** विश्वविद्यालयस्य वित्तसमितिः भविष्यति यस्याः निम्नलिखितसदस्याः भवन्ति, यथा-

(क) अध्यक्षत्वेन कुलपतिः

(ख) सांस्थिकगोष्ठ्या (न्यायालयेन) स्वसदस्यानां मध्ये निर्वाचितौ द्वौ सदस्यौ

(ग) कार्यपरिषदा स्वसदस्यानां मध्ये निर्वाचितौ द्वौ सदस्यौ , तथा च

(घ) राज्यसर्वकारेण मनोनीतौ चित्तौ वा द्वौ सदस्यौ, तयोः एकः वित्तविभागात् ( वित्ततः) अपरः शिक्षाविभागात् ।

**२९. वित्तसमित्याः क्षमताः कर्तव्यानि च-** विश्वविद्यालयस्य वित्तसमित्याः निम्मलिखितक्षमताः कर्तव्यानि च भविष्यन्ति यथा-

(१) आनुमानिक-वार्षिक- अर्थसंकल्पस्य आगणनायाः परीक्षणं कृत्वा तदर्थं कार्यकारीपरिषदः कृते उपदेशदानं परामर्शदानं च।

(२) विश्वविद्यालयस्य वित्तसम्बद्धविषयस्य कार्यकारीणीपरिषदि अनुशंसाः(सूचनाः) कर्तुम्।

(३) दशसहस्र रूप्यकाधिक धनराशिसम्मिलितस्य नूतनव्ययस्य प्रत्येकप्रस्तावस्य परीक्षणं कृत्वा कार्यकारीपरिषदे तदविषये परामर्शदातुम् (परामर्शरानम्)।

(४) विश्वविद्यालयस्सा वित्तीय स्थितेः समये समये समीक्षां कर्तुम् (समीक्षाकरणम्)।

(५) सामान्यतया विश्वविद्यालयस्य वित्तीय स्थितेः उन्नयनार्थं सधनानां सूचनादानार्थम् ।

(६) कार्यकारीपरिषदि वेतनश्रेणीनां तथा नवीनवेतनश्रेणीनां संशोधनं विचारयितुम् अनुशंसितुञ्च तथा च

(७) सम्बिधिभिः अध्यादेशैः च निर्धारितेषु विश्वविद्यालयस्य वित्तीयविषयेषु अन्येषु विषयेषु च निबद्धम्(निवारणं कर्तुं)

**३०. चयनसमिति :-**

(१) (क) विश्वविद्यालयस्य प्राध्यापकः, पाठकाः, सहायकाध्यापकः, कुलसचिवः, कोषाध्यक्षः, ग्रन्थागाराध्यक्षः तथा अन्येषां च अधिकारिणः यथाशक्ति नियुक्त्यर्थं, कार्यकारीपरिषदं प्रति अनुशंसाः कर्तुं सम्विधिभिः प्रदत्ता निम्नलिखितसदस्ययुक्ता चयनसमितिः भविष्यति यथा-

(i) चयनसमितेः अध्यक्षत्वेन कुलपतिः भविष्यति ।

(ii) विश्वविद्यालयस्यान्तर्गतं लाभाय कमपि कार्यालयं न धारयन्तः तादृशाः त्रयः जनाः, एकः कुलपतिना नामाङ्कितः, एकः राज्यसर्वकारेण नामाङ्कितः अन्यः च कार्यकारीपरिषदा नामाङ्कितः ।

(iii) कुलसचिवस्य नियुक्तिं विहाय चयनसमितेः कुलसचिवः सदस्यसचिवत्वेन भविष्यति, अस्मिन् सन्दर्भे कुलपतिः कार्यपरिषदा परामर्शं कृत्वा एकं व्यक्तिं सदस्यसचिवरूपेण नामाङ्कयिष्यति ।

(ख) विश्वविद्यालयस्य प्राध्यापकानां नियुक्त्यर्थम् अनुशंसां कुर्वती चयनसमितिः सम्बन्धितविभागप्रमुखं सह अभियोगं करिष्यति,यदि सः प्राध्यापकोऽस्ति, कुलपतिना नामाङ्कितः विभागस्य एकः प्राध्यापकः, तथा शैक्षणिकपरिषद्द्वारा अनुशंसितानां व्यक्तिनां पञ्चेभ्यः न्यूनं न भवति इति कर्मसम्पादिकाभ्यः कार्यकारीपरिषदा

नामाङ्किताः त्रयः जनाः ये विश्वविद्यालयस्य सेवायां न भवन्ति , येषां प्राध्यापकचयनविषये विशेषज्ञानमस्ति यस्य कृते प्राध्यापकस्य चयनं कर्तव्यं भवति।

(ग) विश्वविद्यालयस्य सहायकाध्यापकानाम् अथवा सहाध्यापकानाम् अन्येषां शिक्षकानां च नियुक्त्यर्थम् अनुशंसां कुर्वती चयनसमितिः सम्बन्धितविभागस्य अध्यक्षं सह अभियोगं करिष्यति, कुलपतिना नामाङ्कित(मनोनीत)विभागस्य एकः प्राध्यापकः,तथा च (द्वौ जनौ) शैक्षणिकपरिषद्वारा अनुशंसितेषु व्यक्तिषु पञ्चभ्यः न्यूनं न भवति तेषु येषां विषये विशेषज्ञानं वा रुचिः वा अस्ति, यस्य विषयस्य कृते सहायकाध्यापकः अहाध्यपको वा चयनीयो भवति, ध्यातव्यं यत्,यस्मिन् कार्यकारिपरिषद् प्राध्यापकानां, सहायकाध्यापकस्य च पदानां चयनसमित्या व्यवस्थापितायाः योग्यतायाः क्रमात् नियुक्तिं कर्तुं प्रस्ताव गृह्णाति, सा स्वकारणानि लिखितरूपेण अभिलेख्य कुलाधिपतिसमक्षं प्रस्तौति यश्च प्रस्तावस्यानुमोदनं कर्तुं शक्नोति अन्यथा पुनर्विचारार्थं कार्यकारीपरिषदं प्रति प्रत्यागच्छति। पुनर्विचारानन्तरं यदि कार्यकारिपरिषदः स्वस्य मूलप्रस्तावस्य अनुसरणं कर्तुम् इच्छति तर्हि पुनः कुलपतिसमीपं तस्य निर्णयार्थं प्रस्तौति यत् अन्तिमः भविष्यति।

प्रदीयते यत् यत्र चयनसमितिः केवलं एकस्य जनस्य नाम कार्यकारिपरिषदि अनुशंसयति तथा च अजौ जनः कार्यकारिपरिषदः कृते स्वीकार्यः नास्ति, तत्र कार्यकारीपरिषद् अनुशंसा न स्वीकृत्य स्वकारणानि लिखितरूपेण अभिलेखयिष्यति तथा च कुलसचिवं विज्ञापयितुं निर्देशयिष्यति यत् पुनः रिक्तस्थानं कृत्वा नवीनसूचनार्थं(अनुशंसितुं) चयनसमित्याः सभामाहूय एवं कृत्वा चयनसमितेः प्रत्येक सदस्याय अभिलेखानां कारणानि सूचयितुम् इति ।

(घ) यत्र विश्वविद्यालयस्य अध्यापकानाम् अस्थायी रिक्तस्थाने नियुक्तिः कर्तव्या भवति,तत्र यदि रिक्तस्थानं एकवर्षस्य वा अधिकस्य वा अवधिपर्यन्तं भवति तर्हि चयनसमित्या अनुशंसया तदनुसारं कार्यकारीपरिषदा नियुक्तिः विधीयते इति।

(२) यदि चयनसमितेः सदस्यः उपस्थातुम् असमर्थः भवति तर्हि सः कुलपतिं प्रति लिखितरूपेण स्वमतं प्रेषयितुं शक्नोति तथा च चयनसमित्या स्वस्य अनुशंसाकरणसमये (सूचनावसरे) एतादृशं मतं विचार्यते । व्याख्या: प्रयोजनार्थम् अस्मिन् खण्डे , सह-अनुमोदिताः सदस्याः, यस्य प्रयोजनाय सह अनुमोदिताः सन्ति, तदर्थं चयनसमित्याः सदस्याः इति गण्यन्ते ।

(३) कार्यकारीपरिषद् अन्यप्रशासनिकपदेषु नियुक्त्यर्थं कार्यकारीपरिषदं प्रति अनुशंसां कर्तुं एकसमित्याः वा अधिकसमित्याः गठनं करिष्यति तथा च आध्यादेशद्वारा एतादृशीनाम् अनुशंसानाम् अनुसरणं कर्तुं प्रक्रियां पद्धतीश्च निर्धारयितुं शक्नोति

**३१. छात्रपरामर्शपरिषद्-** (१) छात्रपरामर्श परिषद् भविष्यति, यस्मिन निम्नलिखित- सदस्याः भवन्ति भविष्यन्ति, यथा-

(क) विश्वविद्यालयस्य शिक्षकाणां मध्ये कुलपतिना मनोनीतः (नामांकितः) एकः अध्यक्षः ।

(ख) छात्रकल्याणनिर्देशकः पदेन कोषाध्यक्षः ।

(ग) विश्वविद्याल्यस्य स्नातकोत्तरछात्रसंघस्य अध्यक्षः, उपाध्यक्षः, सचिवश्च ।

(घ) विश्वविद्यालयस्य विधिछात्रसंघस्य अध्यक्षः सचिवश्च ।

(ङ) अधोलिखितेषु पञ्चसु क्रियाकलापेषु प्रत्येकं पञ्च छात्राः ये निम्नलिखित क्रियासु उत्कृष्टं प्रदर्शनं कृतवन्तः, येषां नामकरणं (मनोनयनं) कुलपतिना कृतमस्ति, यथा-

(१) क्रीडा

(२) राष्ट्रियसेवायोजना

(३) राष्ट्रिय सेनाछात्रनिकाय (NCC)

(४) सांस्कृतिकक्रिया:

(५) राष्ट्रियअनुशासनयोजना

(च) कुलपतिना नामाङ्किता: चतस्रः महिलाछात्रा:।

(छ) क्रीडा एवं शारीरिकशिक्षानिदेशक, यदि अस्ति।

(ज) छात्रपरामर्शपरिषद : छात्र सदस्येषु कमपि परिषदः सचिवं चयनमिष्यन्ति

(२) पदेन सदस्यनामतिरिक्तं छात्रपरामर्शपरिषदः सदस्यानां कार्यकाल: एकवर्षं भविष्यति।

(३) छात्रपरामर्शपरिषदः सभायाः गठनाय कार्यनिवाहक गणपूर्तिम् अनुसर्तुं प्रक्रियाया: नियमार्थं, व्यापारस्य सञ्चालनार्थं च अवध्यभ्यन्तरे सभा आहूतव्या भविष्यति तथा च एतादृशाः विषयाः सम्विधिभिः निर्धारिताः भविष्यन्ति।

किन्तु कोऽपि छात्रः छात्र परामर्शपरिषदः छात्रसदस्यः भवितुम् अथवा निरन्तर भवितुं योग्यः न भविष्यति, यावत् सः छात्ररूपेण नामांकनं न करोति अथवा पञ्चविंशतिवर्षस्य आयुः न प्राप्नोति। यदि छात्रसदस्यः अग्रिमे विश्वविद्यालय परीक्षाषाम् उत्तीर्णः न भवति तर्हि सः तादृशः सदस्यः न भवति।

(४) छात्रपरामर्शदानपरिषद : कार्याणि निम्नलिखितरूपेण भविष्यन्ति, यथा

(क) विश्वविद्यालये विश्वविद्यालयसम्बद्धे उपाधि महाविद्यालये च छात्राणां सहपाठ्यक्रमस्य पाठ्येतरस्य च क्रियाकलापविषये विश्वविद्यालयस्य छात्राणां सामूहिकजीवनं प्रभावितं कुर्वत्सु विषयेषु कार्यकारीपरिषदं शैक्षणिकपरिषदं च यथावत् अनुशंसाः कर्तुम्।

(ख) छात्राणां अध्ययनं, कल्याणं, क्रीडा, साहित्यिकं, छात्रावासस्य प्रबन्धनं, छात्राणां गृहं, विस्तारकार्यं, सामाजिककार्यं, छात्राणां स्वास्थं, राष्ट्रियसेवायोजना, राष्ट्रियछात्रसेनानिकायादीनि सर्वाणि विधानानि कार्यकारी परिषद्द्वारा कमपि निर्णयं ग्रहीतुं पूर्वं छात्रपरामर्शदातपरिषदः समक्षं तस्य विचाराणां कृते स्थापितानि भविष्यन्ति।

(ग) छात्राणां कल्याणसम्बद्धे कस्मिन् अपि विषये विश्वविद्यालयस्य कुलपतिः अथवा कोऽपि प्राधिकारी छात्रपरामर्शदातृपरिषदः विचारं प्रष्टुम् अर्हति।

(घ) छात्रपरामर्शपरिषदः अध्यक्षः एव निर्णयस्प प्राधिकारी भविष्यति यत् कश्चन विषयः छात्राणां विषये अस्ति वा नास्ति वा इति।

(ङ) छात्रपरामर्शपरिषद् स्वव्यापारनियमानां निर्माणं करिष्यति तथा च तानि एव कार्यकारिपरिसदि विचारार्थम् अनुमोदनार्थं च प्रस्तौति।

**३२. विश्वविद्यालयस्य निधिः -**

(१) विश्वविद्यालयस्य "कुमारभास्करवर्मविश्वविद्यालयनिधिः " इति नाम्ना प्रसिद्धः कोषः भविष्यति, यस्मिन् अन्येभ्यः स्रोतेभ्यः स्वस्य सर्वाणि आय-शुल्क-दण्ड-योगदान-दान-ऋणादीनि अग्रिमाणि च श्रेयस्कराणि भविष्यन्ति।

विश्वविद्यालयः अस्मिन् पक्षे निर्मितेन अध्यादेशेन प्रशासनार्थम् एकं वा अधिकं वा पृथक् विशिष्टप्रयोजनार्थं विशेषनिधिम् अक्षयनिधिं न्यासं वापि निर्मातुम् अर्हति।

(२) राज्यसर्वकारः अस्य अधिनियमस्य प्रयोजनार्थं विश्वविद्यालयकोषे प्रतिवर्षं पर्याप्तराशिं समुचितराशीनां योगदानं करिष्यति, विश्वविद्यालयस्य पुनरावर्तनीयाः शुल्कत्वेन।

**३३. लेखाः लेखापरीक्षा च –**

(१) प्रत्येकस्य सम्पन्नवित्तीयवर्षस्य लेखाविवरणं अग्रिमवर्षे लेखापरीक्षाप्रतिवेदनेन सह सा्ंस्थिकगोष्ठ्याः(न्यायालयस्य) विचारार्थं स्थापितं भविष्यति। अस्य प्रयोजनार्थं लेखक्रियायाः लेखापरीक्षा महालेखाकारस्य समग्रलेखापरीक्षायाः अधीनस्थस्य राजाज्ञया स्थापितविशेषाधिकारप्राप्तस्य लेखाकारस्य दृढपत्रेण भविष्यति।

(२) एतादृशं वार्षिकलेखाविवरणं तस्य लेखापरीक्षाप्रतिवेदनस्य प्रतिलिपिना सह कार्यकारीपरिषदः माध्यमेन विश्वविद्यालयस्य सांस्थिकगोष्ठ्यै (न्यायालयाय) राज्यसर्वकाराय च प्रस्तुतव्यं भविष्यति, ततः राज्यसर्वकारः तदेव आधिकारिकराजपत्रे प्रकाशयितुं शक्नोति।

(३) विश्वविद्यालयस्य वित्तसमितिः त्रैमासिकान्तरालेन आन्तरिकलेखापरीक्षां करिष्यति तथा च एतादृश्याः लेखापरीक्षायाः प्रतिवेदनं नियमितरूपेण राज्यसर्वकाराय प्रस्तुतव्यं भविष्यति।

(४) अत्र पूर्वतः किमपि अस्ति चेदपि विश्वविद्यालयस्य लेखापरीक्षायाः आदेशाय यदा आवश्यकम् अनुभूयते तदा सर्वकारस्य अधिकारः भविष्यति, यत्र सः तादृशैः लेखापरीक्षकैः प्रबन्धितानाम् अभिप्रायानां निर्धारणसहितं यथा निर्देशं कर्तुम् (करोति)।

(५) धारा 17(ख) इत्यस्मिन् उल्लिखितानां वार्षिक-अर्थसंकल्प-आगणनानां(अनुमानानाम्), कार्यकारीपरिषद्द्वारा एतेषाम् अन्तिमरूपीकरणानन्तरं सांस्थिकगोष्ठ्यां (न्यायालये) प्रस्तुतीकरणात् न्यूनातिन्यूनं पञ्चदशदिनेभ्यः पूर्वं राज्यसर्वकाराय, कुलपतये, न्यायालयस्य सर्वेभ्यः सदस्येभ्यः च प्रसारितं भविष्यति।

**३४. विधानम् –**

(१) अस्याधिनियमस्य विध्यनुसारं, न्यायालयेन अनुमोदितं भवति चेत् कार्यवाहिपरिषद् अधिनियमस्यास्य खण्डान् प्रयोक्तुं सम्विधिरचनां कर्तुं शक्नोति तथा च सर्व-विषयेषु सम्विधेः प्रयोगो भविष्यति अथवा सम्विधिव्यवस्थापनानुसारं भविष्यति।

(२) केनापि पक्षपातेन विना उपर्युक्तोपखण्डीयसम्विधयः सर्वेषां कृते प्रयोज्याः भविष्यन्ति अथवा निम्नोलिखितविषयेषु कश्चित् यथा-

(क) विश्वविद्यालयस्याधिकारी भवितुं विश्वविद्यालये कर्मरतजनस्य घोषणापत्रम्।

(ख) विश्वविद्यालये कर्मरतानां सर्वेषां अधिकारिभिः कुलपतिना सार्धं सर्वेषां पदाधिकारीणां नियुक्तिः, क्षमताः, कार्यावली, कार्यकालः तथा च पणाः अस्मिन्नधिनियमे सन्निविष्टाः न विद्यन्ते।

(ग) विश्वविद्यालयस्य विभिन्नानां कर्तृपक्षाणां घोषणा च ।

(घ) विश्वविद्यालयस्य अधिकारिणां सांस्थिकसदस्यानां संविधानं, क्षमता, तथा कार्यावली अधिनियमेऽस्मिन् व्यवस्थाप्यते।

(ङ) अनुष्ठानस्य विधिस्तथा च वृत्ति-पुरस्कार-उपाधि-अवैतनिकोपाधि, पद-डिप्लोमा-मानपत्रैः सह अन्यान्यशैक्षिकसम्मान-पुरस्कारप्रदानं तथा तेषां प्रत्याहरणम्, विधिद्वाराअनुमोदनप्राप्तमहाविद्यालयानां स्वीकृतिप्राप्तानुष्ठानानां स्थापनंनिराकरणं च, विश्वविद्यालयद्वारा संरक्षिताः संचालिताः ग्रन्थागाराः परीक्षागाराः, संग्रहालयाः, सभागाराः, छात्रावासः, आवासाः, अथवा विश्वविद्यालयद्वारा अपरिचालितविधयः यथा अनुमोदनं स्वीकृतिं च प्रत्याहारकरणविषयकपणानि तथा च तादृशाः महाविद्यालयाः संस्थानानि च येषां अनुमोदनं स्वीकृतिप्रदानं चेतिविषये विशेषाधिकारविषयकविषयाः,-

उपलभ्यते यत् केषामपि महाविद्यालयानां परिचालनमस्य संविधिःन स्थास्यति। अपि च कर्मचारिणः नियोजनस्य पणानि सर्वकारीयमहाविद्यालयस्य नीत्यनुसारं भविष्यति तथा च सर्वकारीयानुदानप्राप्तमहाविद्यालयानां कृते राज्यसर्वकारेण प्रयुक्तनीतिनियमानां विश्वविद्यालयेन सह आलोच्य रचनां कुर्यात्।राज्यसर्वकारस्य पूर्वानुमोदनेन विना विश्वविद्यालयः कस्यचित् नूतन-महाविद्यालयस्योद्घाटनस्य अनुमोदनं कर्तुं न शक्नोति। तथा विश्वविद्यालयस्य कस्यश्चित् नूतनप्राक्विश्वविद्यालयश्रेण्याः महाविद्यालयस्य वा अनुज्ञाप्रदानस्य अनुमोदनप्रदानस्य अधिकारक्षेत्रं न भविष्यति।

(च) महाविद्यालयानाम् अनुष्ठानानाम् अन्यान्यसंस्थानां च संलग्नीकरणं स्वीकृतिप्रदानं अनुमोदनंचेति विषये परिदर्शनमनुसन्धानानि च कार्यवाहिपरिषदा प्रणालीबद्धभावेन कर्त्तव्यानि भवति। तथा कार्यवाहिपरिषद् तेषामुपरि सामान्यनियन्त्रणस्य पर्यवेक्षणस्य च दायित्वपालनं करिष्यति।

३. सांस्थिकगोष्ठ्याः यः कोऽपि सदस्यः सम्विधिप्रारुपगोष्ठयां प्रस्तावयितुं शक्नोति तथा सा गोष्ठी ईदृकप्रारूपं कार्यवाहिपरिषदं प्रेरितं शक्नोति यथा कार्यपालिकापरिषद् तद्विषयं ग्रहीतुं पारयति अथवा परामर्शेन सह प्रारूपं प्रदातुं शक्ष्यति।

४. किन्तु अस्मिन् खण्डे विद्यमाने कस्मिंश्चित् विषये कार्यवाहिपरिषदः कस्यापि सम्विधेः प्रारूपं न प्रयच्छति, यत्र विश्वविद्यालयस्याधिकारीणां क्षमता-कार्यावली-संविधानानां च उपरि प्रभावारोपितो भवति। यावत् पर्यन्तं तस्मिन् विषये प्राधिकारिणः स्वमन्तव्यप्रदानस्य सुविधां नायाति तावत् कुलपतिः कार्यपालिकापरिषदं प्रारुपस्य गोष्ठ्याम् उपस्थापयितुं न अनुरुन्धे।

५. कश्चित् नवसम्विधिः, सम्विधिपरकसंयोजनं, संशोधनं, सम्विधेः परिष्करणं परिवर्तनं च कुलपतेः पूर्वानुमतेः प्रयोजनं भवति।येन सम्मति-असम्मतिभिः चर्चाभिः एतं लाघवं कर्तुं शक्नोति।

**३५. अध्यादेशाः -**

(१) अस्य अधिनियमस्य विधानस्य च प्रतिविधानानाम् आधीन्ये कार्यकारीपरिषद विधानानां निर्वाहणार्थं तथा च सर्वेषां विषयाणां सम्बन्ध अध्यादेशं कर्तुं शक्नोति येषां प्रतिविधानम् अनेन अधिनियमेन वा विधानेन वा अपेक्षिता: सन्ति वा भवितुं शक्यते वा इति अध्यादेशैः प्रदत्तम्।

(२) पूर्ववर्तिनः उपाधारासामान्यतायाः क्षतिं विना अध्यादेशः निम्नलिखितविषयेषु सर्वेषां वा कस्यापि वा विषयस्य (प्रबन्धनं) प्रतिविधानं कर्तुं शक्नोति, यथा-

(क) विभागेषु, महाविद्यालयेषु, संस्थासु अन्येषु च निकायेषु छात्राणां प्रवेशः भवेत् यद्वा तानि गठितानि, सम्बद्धानि, मान्यता प्राप्तानि वा भवेयुः,तथा च सर्वेषु वा कस्मिन्नपि उपाधि-पदविका-अध्ययन- पाठक्रमेषु,

(ख) विश्वविद्यालयस्य न्यायलयस्य (सांस्थिकगोष्ठयाः), कार्यकारी परिषदः, शैक्षणिक परिषदः तथा अन्येषां प्राधिकारिणां समितिनां च निर्वाचनं कर्तुं तथा विश्वविद्यालयस्य विभिन्नाधिकारिषु वरिष्ठताधारेण परिवर्तनेन सदस्यचयनस्य प्रयोजनार्थं व्यक्तीनां संवेदनशीलतां निर्धारयितुं नियमाः प्रक्रियाश्च,

(ग) विभागेषु विभिन्नेषु अध्ययनपाठ्यक्रमेषु तथा विश्वविद्यालयेन सञ्चालित परीक्षासु छात्राणां प्रवेशार्थं शुल्कम् आरोपयितुम्

(घ) विश्वविद्यालयस्य कर्मचारिणां हिताय भविष्यनिधिनां वा अन्यनिधिनां वा निर्माणम्

(ङ) महाविद्यालयेषु, संस्थासु अन्येषु च समितिषु शैक्षणिक नियन्त्रणं पर्यवेक्षणं च कर्तुं, यद्वा तानि घटकानि (गठितानि), सम्बद्धानि मान्यताप्राप्तानि वा भवेयुः तथा च

(च) अस्य अधिनियमस्य अन्तर्गतं कार्यकारिणीपरिषद्द्वारा करणीयानि परीक्षणानि (समीक्षणानि) अथवा अनुसन्धानानि

(३) पूर्ववर्तिनि उपधारायां निहितं किमपि न सहन्ते चेत, नियुक्तिविधायाः परिस्थितीनां अथवा परीक्षकाणां कर्तव्यानाम् अथवा परीक्षायाः सञ्चालनं वा मानकं वा कस्यापि अध्ययनस्य पाठ्यक्रमं वा प्रभावितं कुर्वन् कोऽपि अध्यादेशः न क्रियते, यावत् तादृशस्य अध्यादेशस्य प्रारूपं न भवति, शैक्षणिक परिषदद्वारा विचारितः अस्ति यत् कार्यकारीपरिषदः तस्मै निर्दिष्टः इति शैक्षणिकपरिषदः मतं विचारितवान् अस्ति।

३६. **विनियमाः-**

(१) विनियमोऽयं व्यवस्थापनाधीनः, सम्विधयः तथा अध्यादेशाः च अस्य अधिनियमस्यविनियमप्रसंगे विश्वविद्यालयस्य प्राधिकारिणः कार्य-सम्पादने प्राप्तक्षमताप्रयोगे चसम्विधिस्तथा अध्यादेशविषये नीतिरचनां कर्तुं शक्नोति।

(२) जनतासु काञ्चित् विद्वेषभावनाम् अनुत्पाद्य तादृक्विनियमस्य पूर्वतनाः उपशाखाः सर्वस्मिन् क्षेत्रे प्रयोज्याः भवन्ति। अथवा निम्नोल्लिखिताः ये केऽपि, यथा

(क) निर्दिष्टप्राधिकारिणा सह युक्तसभायां कार्यप्रणाली अवलम्वनीयाभवति। तथा अस्य संरचनायां सदस्यसंख्या अधिका भवितव्या।

(ख) अधिनियमोऽयं सम्विध्यध्यादेशयोः अन्तर्गताः सर्वे विषयाः यथाविधिनियमानुसारं भवेयुः।

(ग) प्राधिकारिणा साकं युक्ताः सर्वे विषयाः प्राधान्येन अन्यभावेन च न गृहीत्वा अयमधिनियमः, सम्विधिषु अध्यादेशेषु च येषां कृते अथवा येन माध्यमेन उल्लिख्यते तत्र प्रयुक्तव्यं भवति।

**३७. अधिनियमः अथवा प्रस्तावाः किञ्चित् कारणमथवा विशेषानियमतां न भवति चेत् अवैधो न भवति -**

विश्वविद्यालयस्य कस्याश्चित् समित्याःप्राधिकारिणो विधिः प्रस्तावो वा बाधितो/अचलो भविष्यति यदि कर्मरतस्य पदाधिकारिणः पदं रिक्तं भवति, केनचित् कारणेन सदस्यानां पदानि रिक्तानि भवन्ति चेत् निर्वाचने मनोनयने नियुक्त्यां च अव्यवस्थायाः/व्यभिचारस्य वा अवकाशो भविष्यति।

**३८. कुलाधिपतेः निर्णयः कतिपयेषु विषयेषु अन्तिमः निर्णयः -**

यदा कदापि कश्चित् प्रश्नः उत्पद्यते यत् कश्चित् व्यक्तिः विधिपूर्वकं निर्वाचितः, नियुक्तः चयनितः नामाङ्कितो मनोनीतो वा, अथवा विश्वविद्यालयस्य कस्यापि प्राधिकरणस्य वा संस्थायाः वा निकायस्य वा सदस्यत्वस्य अधिकारिणी अस्ति अथवा विश्विद्यालयस्य कुलपतिः अस्य अधिनियमस्य, विधानस्य, अध्यादेशस्य च अनुरूपोऽस्ति,तदवस्थायां यः प्रश्नः कुलाधिपतिं प्रति प्रेषितो भविष्यति , तस्मिन् अस्य निर्णयः अन्तिमः भविष्यति।

**३९. प्राधिकारिणां सदस्यतायाः अवधिः -**

(१) विश्वविद्यालयस्य सर्वेषां प्राधिकारिणां सर्वे पदेन-सदस्याः तावत्पर्यन्तं पदं सदस्यतां वा धारयिष्यन्ति, यावत् ते , अधिकारिणत्वम् अथवा पदं धारयन्ति, यस्याधारेण ते प्राधिकारिणः तादृशाधिकरणानाम् सदस्याः भवन्ति।

(२) अस्मिन् अधिनियमे अन्यथा प्रावधानं विहाय विश्वविद्यालयस्य अन्ये सर्वे सदस्याः पञ्चवर्षपर्यन्तम् अथवा सदस्यतायाः कार्यकालस्य समाप्तिपर्यन्तं वा , यत्किमपि पूर्वं भवति, सम्बन्धितसदस्यानां निर्वाचनदिनात् आरभ्य चयनस्य नामाङ्कनस्य नियुक्त्याः वा तिथिं यावत् पदं धारयिष्यन्ति।

किन्तु ध्यातव्यं यत् कस्यापि प्राधिकरणस्य सदस्यतायाः अवधिः समाप्तं भवति चेदपि तादृशाः सदस्याः तावत्पर्यन्तं सदस्यतां धारयिष्यन्ति यावत् तस्य स्थाने नूतनसदस्यस्य निर्वाचनं, नामाङ्कनं, नियुक्तिं, चयनं वा न भवति।

अग्रे किन्तु उपधारा(१) धारा (१६) खण्डः (xxii) इत्यस्य अन्तर्गतं निर्वाचितः कश्चित् सदस्यः निर्वाचनदिनात् केवलं एकवर्षावधिपर्यन्तं पदं धारयिष्यति। विश्वविद्यालयस्य छात्रत्वं त्यक्त्वा सः सांस्थिकगोष्ठ्याः (न्यायालयस्य) सदस्यत्वं विरमति।

(३) आकस्मिकं रिक्तस्थानं पूरयितुं निर्वाचितः, नामाङ्कितः, मनोनीतः, नियुक्तः चयनितो वा कश्चित् सदस्यः यस्य सदस्यस्य आसने सः एवं निर्वाचितः, नामाङ्कितः, नियुक्तः, चयनितो वा भवति, तस्य कार्यकालस्य अवधिसमाप्तभागस्य कृते पदं धारयिष्यति।

(४) सांस्थिकसभायाः (न्यायालयस्य) अनुमोदनेन कुलपतिः उपधारा (१) धारा (१६) खण्ड (xxii) इत्यस्य अन्तर्गतं निर्वाचितं सदस्यं निष्कासयितुं शक्नोति, यदि सः तस्मिन् प्रावधाने (प्रतिविधाने) निर्धारितप्रतिबद्धताः न पूरयति।

**४०. सम्बद्धता -** अस्य अधिनियमस्य आरम्भानन्तरं विश्वविद्यालये सम्बद्धतायाः आवेदनं कुर्वन् कोऽपि महाविद्यालयः संस्था वा कार्यकारीपरिषदं संतुष्टं करिष्यति।

(क) महाविद्यालयः विधिपूर्वकं गठितस्य शासकीयसंस्थायाः प्रबन्धने भविष्यति यस्मिन् महाविद्यालयस्य अथवा संस्थायाः शिक्षणकर्मचारिणां न्यूनातिन्यूनं प्रतिनिधिद्वयं, यथा प्रकरणं, साध्यक्षं समाविष्टौ भविष्यतः।

(ख) यत् महाविद्यालयस्य अथवा संस्थायाः भूमिः भवनानि च यथावत् सन्ति, तत्र शिक्षणार्थम् उपकरणानि पर्याप्तानि उपयुक्तानि च सन्ति।

(ग) यत् शिक्षणकर्मचारिणां निर्देशितपाठ्यक्रमस्य कृते शक्तिः योग्यताश्च पर्याप्ताः भवन्ति, यत्र महाविद्यालये वा संस्थायां वा निर्दिष्टाः पाठ्यक्रमाः प्रदत्ताः भवेयुः, तथा च अध्यापककर्मचारिणां कार्यालयस्य कार्यकालः(अवधिः) उचितोऽस्ति।

(घ) छात्राणां कल्याणकारक- अनुशासनस्य पर्यवेक्षणस्य च पर्याप्तव्यवस्था भविष्यतीति।

(ङ) महाविद्यालयस्य अथवा संस्थायाः वित्तीयसंसाधनाः तस्य निरन्तररक्षणस्य कुशलकार्यस्य च प्रावधानं (प्रतिविधानं) कर्तुं प्रबन्धयितुं वा पर्याप्ताः सन्ति, तथा च.।

(च) यत् एकस्मिन् परिसरे (समानपरिसरे) अन्यैः महाविद्यालयैः संस्थाभिः वा प्रदत्तानां शिक्षासुविधानां विषये महाविद्यालयस्य संस्थानां वा सम्बद्धता शिक्षायाः हिताय हानिकारकं न भविष्यति।

**४१. प्रतिनिधिमण्डलम् (नियोगिनः) -**

(१) अस्य अधिनियमस्य प्रावधानानाम् अधीनं कुलपतिः तस्य प्रत्यक्षप्रशासनिकनियन्त्रणे पूर्वकुलपतिना सह कुलाधिसचिवः अथवा कुलसचिवः अस्य अन्तर्गतम् अथवा अनेन अधिनियमेन प्रदत्तम् अथवा आरोपितम् स्वस्य अधिकारम् अथवा कर्तव्यं कस्मैचित् अधिकारिणे (कञ्चित् अधिकारिणं प्रति) प्रत्यायोजयितुं शक्नोति।

२) अस्य अधिनियमस्य प्रावधानानाम् अधीनस्थविषयाः -

(क) अत्र सांस्थिकगोष्ठी (न्यायालयः) अनेन अधिनियमेन प्रदत्तं वा आरोपितं वा स्वस्य कस्यापि अधिकारस्य कर्तव्यस्य च प्रत्यायोजनं कर्तुं शक्नोति, यत्

(क) कुलपतिः

(ख) कार्यकारिणी परिषद्, अथवा

(ग) स्वसदस्यानां मध्ये संगठिता समितिः।

(ख) अत्र कार्यकारीपरिषद् अनेन अधिनियमेन प्रदत्तं वा आरोपितं वा तस्यान्तर्गतं वा स्वस्य कस्यापि अधिकारस्य अथवा कर्तव्यस्य प्रत्यायोजनं कर्तुं शक्नोति अथवा..

(क) कुलपतिः

(ख) कुलाधिसचिवः

(ग) कुलसचिवः

(घ) स्वसदस्यानां मध्ये गठितसमितिः,

(ङ) स्नातकोत्तरमण्डलम् अथवा स्नातकमण्डलम् अथवा

(च) वित्तसमितिः

(ग) शैक्षणिकपरिषद् अनेन अधिनियमेन प्रदत्तं वा आरोपितं वा तस्यान्तर्गतं वा स्वस्य कस्यापि अधिकारस्य कर्तव्यस्य वा प्रत्यायोजनं कर्तुं शक्नोति -

(क) कुलपतिः
(ख) कुलाधिसचिवः
(ग) कुलसचिवः
(घ) स्वसदस्यानां मध्ये गठितसमितिः,
(ङ) स्नातकोत्तरमण्डलम् अथवा स्नातकमण्डलम् अथवा
(च) अध्ययनमण्डलेषु कश्चन अपि।

(घ) वित्तसमितिः अनेन अधिनियमेन अथवा तस्यान्तर्गतं प्रदत्तं वा आरोपितं वा स्वस्य कमपि अधिकारं कर्तव्यं च कुलपतये प्रत्यायोजयितुं शक्नोति।

**४२. क्षणिकप्रतिविधानम् -**

(१) कुलाधिपतिःअस्य अधिनियमस्य प्रस्तावस्य(समुपक्रमस्य) तिथ्याः आरभ्य मासत्रयाभ्यन्तरे तादृशेषु नियमेषु यथायोग्यम् अनुभूयते तथा एकं व्यक्तिं कुलपतित्वेन नियुक्तं करिष्यति

(२) प्रथमःकुलपतेःनियुक्तिदिनात्मासत्रयस्यअवधौअथवातावद्दीर्घकालाभ्यन्तरेकुलाधिपतिःतस्य नियुक्तिदिनात् षण्मासेभ्यःअधिकंनभवेत्तथासूचनया,प्रत्यक्षतया, साहाय्येण च कुलाधिपतिना मनोनीतानां नामाङ्कितानां वा षड्भ्यः अधिकेभ्यः सदस्येभ्यः युक्तसमित्याः विश्वविद्यालयप्रथमविधानानां प्रथमस्य अध्यादेशस्य प्रथमविनियमानाञ्च कुलाधिपतिःप्रथमसम्बन्धिनाञ्च अनुमोदनेन स्वरूपनिर्धारणं वा निमित्तं वा प्रकाशनं कर्तुं कारणस्वरूपः भवति, अध्यादेशाः तथा च प्रथमः नियमः एवं निर्मितः तत्प्रकाशनस्य तिथ्याः आरभ्य प्रवर्तते यथा तेषां सम्बन्धिनाम् अधिनियमस्य प्रावधानानामन्तर्गतं निर्मितः वा गठितः वा तेषां विषये अधिनियमस्य प्रतिविधानम्

(३) प्रथमकुलपतिः प्रमसम्बन्धिनां प्रथमाध्यादेशस्य प्रथमविनियमस्य च प्रवर्तनदिनात् आरभ्य त्रिमासाभ्यन्तरे अथवा यथाशक्ति षण्मासेभ्य अधिकं न तावत्दीर्घकालं यावत् राज्यसर्वकारेण यथाशक्ति अधिसूचनाद्वारा प्रत्यक्षं वा प्रथमविनियमानाम् अनुसारं प्रथमसांस्थिकसभायाः (न्यायालयस्य) प्रथमकार्यपरिषदः प्रथमस्नातकोत्तरमण्डलस्य गठनस्य व्यवस्थाः करणीयाः भवन्ति।

(४) राज्यसर्वकारः अधिकाधिकराजपत्रे अधिसूचनाद्वारा एकां तिथिं नियोजयिष्यति, तथा च तद्दिनाङ्काद् उपधारा(३) इत्यस्यान्तर्गतं गठितस्य विश्वविद्यालयस्य प्राधिकारिणः तेभ्यः अथवा तदन्तर्गतं तेभ्यः प्रदत्तानाम् अधिकारिणां कर्तव्यानां च प्रयोगम् आरभेत, अयम् अधिनियमः प्रमाः सम्विधानाः, प्रथमाः अध्यादेशाः, प्रथमाः विनियमाः च।

(५) विश्वविद्यालयस्य प्रथमसम्विधानाः, प्रथमाः, अध्यादेशाः, प्रमविनियमाश्च तावत्पर्यन्तं प्रवर्तन्ते यावत् अस्य अधिनियमस्य प्रतिविधानस्यान्तर्गतं नवीनविधानाः, नवीनाः, अध्यादेशाः, नवीनविनियमाश्च न क्रियन्ते।

(६) प्रथमः कुलपतिः कुलाधिपतेः अनुमोदनस्य अधीनस्थस्य अनुमोदनस्य प्रतिविधानानां प्रभावस्य आवश्यकता मन्यते, यस्मात्प्रशासनिकलिपिक/ अनुसचिवादिकर्मचारिणः नियुक्तिंकर्तुं शक्नोति।

(७) विश्वविद्यालयस्य गठन कुर्वतां प्राधिकारिणां सर्वेऽधिकारिणः सदस्याः च यथावत्नियुक्ताः नामाङ्किताः मनोनीताः चयनिताः वा निर्वाचिताः वा न भवन्ति चेदपि यस्मिन्दिने अयम् अधिनियमः प्रवर्तते तस्मिन्दिने ततः परं विश्वविद्यालयस्यास्तित्वं प्राप्तवान् इति गण्यते।

**४३. विश्वविद्यालयस्य प्रथमनियुक्तिः अधिकारिणः शिक्षकाश्च-**

(१) अस्मिन् अधिनियमे किमपि निहितं भवति चेदपि प्रथमः कुलाधिसचिवः प्रथमः कुलसचिवः च कलाधिपतिना नियुक्ताः भविष्यन्ति, यथा नियमाः प्रतिबद्धताः च स योग्यं मन्यते।

(२) अस्य अधिनियमस्य आरम्भादनन्तरं कदापि विश्वविद्यालयस्य कश्चिदपि अधिकारी कुलाधिपतेः पूर्वानुमोदनेन कुलपतिना नियोजयितुं शक्नोति।

(३) विश्वविद्यालयस्य शिक्षकानां नियुक्तिः कुलाधिपतिना उपदेष्टासमित्याः अनुशंसां विचार्य कर्तुं शक्यते , यत्र कुलपपतिः अन्ये च जनाः भवन्ति, येषां विषये कुलाधिपतिः सङ्गतिं कर्तुं योग्यमनुभवति।

(४) उपधारा (२) तथा (३) इत्यस्यान्तर्गतं कृता अपि नियुक्तिः पञ्चवर्षेभ्यः अधिकेभ्यः अवधिभ्यः न भवति, तथा च तादृशप्रतिबद्धतासु भविष्यति यथा नियुक्तिप्राधिकारी निर्दिष्टुं योग्यं मन्यते यत् तादृशी नियुक्तिः वित्तीयव्यवस्थापर्यन्तं न क्रियते तस्मात् कृतः अस्ति।

**४४. राज्यसर्वकारस्य पर्यवेक्षण क्षमताः-**

(१) यदा कदा राज्यसर्वकारानुसारं विशेषकारणवशतो वा भविष्यति विश्वविद्यालयस्य कानिचित् कार्याणि न सम्पाद्यन्ते चेत् निर्दिष्टभावेन सर्वकारीयानुदानस्य विश्वविद्यालयकोशस्य च अपप्रयोगस्य अपव्यवहारस्य कृते राज्यसर्वकारः कार्यवाहिपरिषदं तत्तत् विषये प्रष्टुं शक्नोति। अस्मिन् विषये राज्यसर्वकारः विषयस्यास्य विस्तृतविवरणं समयसुविधानुसारं ज्ञातुमिच्छति तर्हि कार्यपरिषद् तद्विषयकप्रस्तावं ग्रहीतुं शक्नोति।

(२) यदि कार्यपरिषद् किमपि व्याख्यानं दातुम् असफलं भवति अथवा प्रस्तावम् अददात्, प्रस्तावाः ये राज्यसर्वकारस्य मतेन सन्ति असन्तोषजनकं भवति चेत् राज्यसर्वकारः एतादृशान् निर्देशान् निर्गन्तुं शक्नोति, ये प्रकरणस्य परिस्थितौ आवश्यकाः वाञ्छनीयाः च इति भासन्ते, कार्यपरिषच्च तादृशनिर्देशान् प्रभावी करिष्यति।

**४५. राज्यसर्वकारस्य आपत्कालिशक्तिः/ क्षमता**

(१) यदि कस्मिन् अपि काले राज्यसर्वकारस्य मतं विकल्पेन समुचितं प्रतीयते तर्हि राज्यसर्वकारः कुलाधिपतिना सह पूर्वपरामर्शं कृत्वा आधिकारिकराजपत्रे प्रकाशितेन अधिसूचनाद्वारा सर्वान् वा कमपि वा निलम्बनं कर्तुं शक्नोति , विश्वविद्यालयस्य अधिकाराः यथा धारा ४ मध्ये प्रदत्ताः सन्ति तथा च अन्ये अधिकाराः ये एतादृशानाम्

अधिकारिणां सहायकाः भवेयुः तथा च प्रबन्धनस्य सर्वे वा केऽपि अधिकाराः, एतादृशानां आधिकारिकानां वा अधिकारिणां वा धारणं , सञ्चालनम्, अधीक्षकं च व्यवस्थापनं, नियोजनं चेत्यादिषु समाविष्टानि कार्याणि गृह्णन्ति , कस्यचित् जनस्य वा प्राधिकारिणः वा कस्याश्चित् अधिकपरिक्षायाः वा कस्याश्चित् परीक्षायाः परिणामस्य प्रकाशनस्य वा तस्य अनुषङ्गिकस्य कस्यचित् विषयस्य कृते तादृशावधिपर्यन्तं यत् अधिसूचनायां निर्दिष्टं भवति तथा च राज्यसर्वकारेण यदा आवश्यकं भवति तदा तस्य प्रयोगः कर्तुं शक्यते, एतादृशी अवधिः तादृशरीत्या तथा तादृशाधिकारिभिः वा प्राधिकारिभिः वा राज्यसर्वकारेण योग्यं (मन्यते), अनुभूयते।

(२) पूर्व उपधारायां उल्लिखितानां विषयेषु कस्यचित् एकस्य वा अधिकस्य वा विषये अस्य अधिनियमस्य अन्तर्गतं निर्मितानां विधानानाम्, अध्यादेशानां, विनियमानाञ्च प्रतिविधानानां, तत्रोल्लिखितानां केषाञ्चित् प्रयोजनानां वा कृते एतादृशरीत्या संशोधनं कर्तुं शक्यते यथा राज्यसर्वकारः कुलधिपतिना सह पूर्वपरामर्शं कृत्वा तदनुसारं प्रभावयिष्यति तथा च कार्यकारी/कार्यवाही उपधारान्तर्गतानाम् अधिकारानां प्रयोगोद्देश्ये करिष्यति।

(३) राज्यसर्वकारः न्यूनातिन्यूनं त्रिभिः व्यक्तिभिः युक्तायां उपदेष्टृसमित्याः गठनं कर्तुं शक्नोति ये राज्यसर्वकारस्य मतेन प्रख्याताः शिक्षाविदः कार्यवन्तः उत्तरदायिवन्तः च सन्ति येषां विषये एतादृशाः अधिकाराः राज्यसर्वकारेण उपधारा (१) अस्य खण्डस्य अधिकाराः विद्यन्ते।

(४) पूर्वोक्तानि उपधारान्तर्गतानि कृतानि सर्वाणि कार्याणि तथा आयोजिताः सर्वाः परीक्षाः तथा च एतादृशाः कस्याश्चित् परीक्षायाः सर्वे परिणामाः प्रकाशिताः तथा च अस्य खण्डस्य अन्तर्गतं कृतानि अन्यानि सर्वाणि कार्याणि एषां प्रावधानानामनुसारं कृतानि, आयोजितानि वा प्रकाशितानि वा इति गण्यन्ते, कार्यं करोति, तदनुसारं च प्रभावयिष्यति।

(५) यदि पूर्ववत्युपधाराया अन्तर्गतानां अधिकाराणां प्रयोगाय अस्य अधिनियमस्य अथवा तत्र निर्मितानाम् विधानानाम्, अध्यादेशानां, विनियमानाञ्च कस्यापि एकस्य वा अधिकस्य प्रतिविधानस्य प्रभावं कर्तुं कोऽपि कठिनता उत्पद्यते तर्हि राज्यसर्वकारः आवश्यकतायां सत्यां कुलपतिना सह एतेषाम् अधिकाराणां प्रयोगार्थं परामर्शेन प्रतीयते तादृशीं कठिनतां आदेशेन दूरीकर्तुं शक्नोति।

**४६. सञ्चितिः (सञ्चयाधिकोषः) -**

अस्मिन् अधिनियमे निहितस्य अधिनियमस्य वा सम्विधेः वा विनियमस्य वा नियमस्य वा कोऽपि निर्णयः वा कृतादेशो वा किमपि अस्ति चेदपि अस्य अधिनियमस्य आरम्भात् तत्क्षणपूर्वं प्रचलितानां विधानानाम्, विनियमानाम् अन्तर्गतं प्रशंसितः कोऽपि कार्यवाही वा कार्यकरी वा सन्ति ते यथावत् प्रवर्त्तन्ते, ते अस्य अधिनियमस्य प्रतिविधानैः (प्रावधानैः) सह असङ्गताः न भवन्ति तथा च अस्य अधिनियमस्य प्रतिविधानानाम् अन्तर्गतं प्रारब्धाः, दत्ताः, कृताः, विहिताः गृहीताः वा इति गण्यन्ते।

**४७. व्याख्या -**

यदि अस्य अधिनियमस्य कस्यापि प्रावधानस्य व्याख्याविषये कोऽपि विवादः उत्पद्यते तर्हि राज्यसर्वकारेण दत्ता व्याख्या अन्तिमरूपेण सम्बद्धानां सर्वेषां कृते बाध्यकारी च भविष्यति।

**४८. कष्टानां निष्कासनम्** -

यदि अस्य अधिनियमस्य आरम्भात् परं विश्वविद्यालयस्य प्रथमसंविधानस्य पुनर्गठनप्राधिकरणस्य वा विषये किमपि कठिनता उत्पद्यते तर्हि प्रथमं अस्य अधिनियमस्य प्रावधानानां प्रभावं कृत्वा राज्यशासनस्य आदेशेन यत्किमपि कठिनतां दूरीकर्तुं तेषां दृष्ट्या आवश्यकं प्रतीयते।

**मो. ए. हक**
**असमसर्वकारस्य सचिवः**
**विधायीविभागः, दिशपुरम्**

<u>अनूदितं पत्रम्</u>